तदिदं कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिं वेणीसंहारं नाम नाटकं प्रयोक्तुमुद्यता वयम्। तदत्र कविपरिश्रमानुरोधाद्दात्तकथावस्तुगौरवाद्वा नवनाटककुतूहलाद्वा भवद्भिरवधानं दीयमानमभ्यर्थये।

नेपथ्ये। भाव वर्यतां वर्यताम्। एते खल्वार्यविदुराज्ञया पुरुषाः सर्वमेव शैलूषजनं व्याहरन्ति। प्रवर्त्यन्तामातोद्यविन्यासादिका विधयः। प्रवेशकालः किल तत्रभवतः पाराशर्यनारदतुम्बुरुजामदग्न्यप्रभृतिभिर्मुनिवृन्दारकैरनुगम्यमानस्य भरतकुलकितिकाङ्क्षया प्रतिपन्नदूत्यस्य देवकीसूनोश्चक्रपाणेर्मुरारातेर्दुर्योधनशिविरं प्रति प्रस्थातुकामस्येति।

सूत्रधारः। आकर्ण्य सानन्दम्। अहो नु खलु भो भगवता जगत्प्रभवस्थितिनिरोधप्रभविष्णुना विष्णुनाद्यानुगृहीतमिदं भरतकुलं सकलं च राजकमनयोः कुरुपाण्डवराजपुत्रयोराकल्पान्तानलप्रशमकेतुना स्वयं संधिकारिणा कंसारिणा दूतेन। तत्किमिति पारिपार्श्वक नारभ्यसे कुशीलवैः सह संगीतकम्।

प्रविश्य

पारिपार्श्वकः। भवतु। आरभ्यामि। कं समयमाश्रित्य गीयताम्।

सूत्रधारः। नन्वमुमेव चन्द्रातपनक्षत्रक्रौञ्चहंसकुलसप्तच्छदकुमुदकोक-

Digitized by Google

नदकाशकुसुमपरागधवलितगगनदिङ्मण्डलं स्वादुजलजलाशयं शरत्समयमाश्रित्य प्रवर्त्यतां संगीतकम्। तथा ह्यस्यां शरदि।

सत्यज्ञा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥ ६ ॥

पारिपार्श्वकः। सभ्रमम्। भाव शान्तं पापं प्रतिकृतममङ्गलम्।

सूत्रधारः। सवैलक्ष्यस्मितम्। मारिष शरत्समयवर्णनाशंसया कंसा धार्तराष्ट्रा इति व्यपदिश्यन्ते।

पारिपार्श्वकः। भवतु न ज्ञाने। अमङ्गलाशंसयास्य वो वचनस्य कम्पितमिव मे हृदयम्।

सूत्रधारः। मारिष ननु सर्वमेवेदानीं प्रतिकृतममङ्गलं स्वयंसंधिकारिणा कंसारिणा। तथा हि।

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥ ७ ॥

नेपथ्ये। साधिक्षेपम्। आः दुरात्मन्वृथामङ्गलपाठक शैलूषापसद।

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिवहेषु च नः प्रकृत्य।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥ ८ ॥

सूत्रधारपारिपार्श्वकावाकर्ण्य।

पारिपार्श्वकः। भाव कुत एतत्।

सूत्रधारः। पृष्ठतो विलोक्य। अये एष खलु वासुदेवगमनात्कुरुसंधानममृ-

Digitized by Google

ष्यमाणः पृथुललाटतटघटितविकटकीनाशतोरणत्रिशूलायमानभीषण-भ्रुकुटिरापिबन्निव नः सर्वान्दृष्टिपातेन सहदेवेनानुगम्यमानः क्रुद्धो भीमसेन इत एवाभिवर्तते। तत्र युक्तमस्य पुरतः स्थातुम्।

इति निष्क्रान्तौ।

## ॥ प्रस्तावना ॥

Digitized by Google

ततः प्रविशति सहदेवानुगम्यमानः कुंठो भीमसेनः ।

भीमसेनः । आः दुरात्मन्वृथामङ्गल्यपाठक शैलूषापसद । लाक्षागृहेत्यादि पुनः पठति ।

सहदेवः । आर्य मर्षय मर्षय । अनुमतमेव नो भरतपुत्रस्यास्य वचनम् । पश्य । निर्वाणवैरदहना इति यथार्थमेव सभृत्याः कुरवः हतजालंकृतवसुंधराः हतशरीराश्च स्वर्गस्था भवन्तीति ब्रवीति ।

भीमसेनः । न खलु न खलु । अमङ्गलानि चिन्तयितुं नार्हन्ति भवन्तः कौरवाणाम् । संधेयाश्च ते भ्रातरो युष्माकम् ।

सहदेवः । सरोषम् । आर्य ।

धृतराष्ट्रस्य तनयान्कृतवैरान्पदे पदे ।
राज्ञा न चेन्निषेद्धा स्यात्कः क्षमेत तवानुजः ॥ १ ॥

भीमसेनः । एवमिदम् । तत एवाद्यप्रभृति भिन्नो भवद्भ्यः । पश्य ।

प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न च खलु किरीटी न च युवाम् ।
जरासंधस्योरःस्थलमिव विदृढं पुनरपि
क्रुधा संधिं भीमो विघटयति यूयं घटयत ॥ १० ॥

Digitized by Google

सकृदेवः। एवमिति संभ्रमक्रोधेषु युष्मासु कदाचित्खिद्यते गुरुः।

भीमसेनः। सहासम्। किं नाम खिद्यते गुरुः। गुरुः खेदमपि जानाति। पश्य।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराठस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु॥ ११॥

तत्सकृदेव निवर्तस्व। एवं चातिचिरप्रवृद्धामर्षादीपितस्य भीमसेनस्य वचनाद्विज्ञापय राजानम्।

सकृदेवः। आर्य किमिति।

भीमसेनः। एवं विज्ञापय।

युष्मच्छासनलङ्घनाम्भसि मया मग्नेन नाम स्थितं
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि।
क्रोधोल्लासितशोणितारुणगदस्योच्छ्वन्दतः कौरवा-
नद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव॥ १२॥

इत्युत्थितं परिक्रामति।

सकृदेवः। तमेवानुगच्छन्। आत्मगतम्। अये कथमार्यः पाञ्चाल्याश्चतुःशालं प्रविष्टः। भवतु तावदकृतमन्त्रेव तिष्ठामि। इति स्थितः।

भीमसेनः। प्रतिनिवृत्यावलोक्य च। सकृदेव गच्छ त्वं गुरुमनुवर्तस्व। अकृमप्यायुधागारं प्रविश्यायुधसहायो भवामि।

सकृदेवः। आर्य नेदमायुधागारं पाञ्चाल्याश्चतुःशालमिदम्।

भीमसेनः। किं नाम नेदमायुधागारं पाञ्चाल्याश्चतुःशालमिदम्। किंचिद्विहस्य। आमन्त्रयितव्या मया पाञ्चाली। सहदेवं हस्ते गृहीत्वा। वत्स यदार्यः

कुरुभिः संधानमिच्छन्नस्मान्पीडयति तद्भवानपि पश्यतु। उभौ प्रवेशं नाटयतः।

सकृदेवः। आर्य। इदमासनमास्तीर्णम्। अत्रोपविशत्वार्यः। पालयतु कृष्णागमनम्।

भीमसेनः। वत्स कृष्णागमनमित्यनेनोपोद्घातेन तत्स्मृतम्। अथ भगवान्कृष्णः केन प्रकारेण संधिं कर्तुं सुयोधनं प्रति प्रहितः।

सकृदेवः। आर्य पञ्चभिर्ग्रामैः।

भीमसेनः। कर्णौ पिधाय। अकृत्र तस्य देवस्याज्ञातशत्रोरपीदृशस्तेजोऽपकर्ष इति यत्सत्यं कम्पितमिव मे हृदयम्। तद्वत्स न मया श्रुतं न त्वया कथितम्। परिवृत्य स्थित्वा।

यत्तद्दूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः।
दीव्यताद्यैस्तदनेन नूनं तदपि कारितम् ॥ १३ ॥

नेपथ्ये। समस्ससदु समस्ससदु भट्टिणी।

सकृदेवः। नेपथ्याभिमुखमवलोक्यात्मगतम्। अये कथं याज्ञसेनी मुकुरूपचीयमानबाष्पपटलनयनार्यसमीपमुपसर्पति। तत्कष्टतरमापतितम्।

यद्वैद्युतमिव ज्योतिरार्यक्रोधेन संभृतम्।
तत्प्रावृडिव कृष्णेयं नूनं संवर्धयिष्यति ॥ १४ ॥

ततः प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च।

द्रौपदी सबाष्पं निः प्रवसिति।

चेटी। देवि समस्ससदु समस्ससदु भट्टिणी। अबणइस्सदि दे मणुं णिच्चाणुबद्धकुरुवेलो कुमालभीमसेणो।

द्रौपदी। कञ्चे कोदि एदं जइ मकाराअस्स पडिउलो कुविस्सदि।

चेटी। विलोक्य। एसो कुमालो चिट्ठदि ता णं उब्बसप्पदु भट्टिणी।

द्रौपदी। कञ्चे एवं करेम्ह। उभे परिक्रामतः।

Digitized by Google

चेटी। उपसृत्य। ज्जअदु ज्जअदु कुमालो।

भीमसेनः। अमृषवन्सक्रोधं यज्ज्जयतीतमिति पुनः पठति।

चेटी। परिकुविदो विअ कुमालो लक्खीअदि।

द्रौपदी। कञ्चे ज्जइ एवं ता अवकीरणा बि एसा मं अस्सासअदि। ता उवविट्ठा भविअ सुणोमि दाव णाकस्स ववसिदं। तथा कुरुतः।

भीमसेनः। सक्रोधम्। सहदेवमधिकृत्य। किं नाम। पञ्चभिर्ग्रामैः संधिः।

मथ्नामि कौरवशतं समरे न कोपा-
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
संधिं करोतु भवतां नृपतिः पणेन॥ १५॥

द्रौपदी। सहर्षम्। ज्ञानान्तिकम्। णाकु अस्सुदपुव्वं ईदिसं वअणं ता पुणो बि भणाहि।

भीमसेनः। मथ्नामीत्यादि पुनः पठति।

सहदेवः। आर्य किं महाराजस्य संदेशोऽव्युत्पन्न इव गृहीतः।

भीमसेनः। का पुनरत्र व्युत्पत्तिः।

सहदेवः। एवं गुरुणा संदिष्टम्।

भीमसेनः। कस्य।

सहदेवः। सुयोधनस्य।

इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम्।
देहि मे चतुरो ग्रामान्पञ्चमं किंचिदेव तु॥ १६॥

भीमसेनः। ततःकिम्।

सहदेवः। तदेवमनया प्रतिनामग्रामप्रार्थनया पञ्चमस्य चाकीर्तनाद्वि-षभोजननृतुगृहद्यूतसभाद्यपकारस्थानोद्घाटनमेवेदं मन्यामहे।

Digitized by Google

भीमसेनः। साटोपम्। वत्स। एवं कृते किं कृतं भवति।

सहदेवः। आर्य लोकेषपयशःस्वगोत्रक्षयाशङ्कि हृदयमाविष्कृतं कुरुराजस्यासंधेयता च दर्शिता भवति।

भीमसेनः। सर्वमप्येतदनर्थकम्। कुरुषु तावदसंधेयता तदेव निवेदिता यदेवास्माभिरितो वनं गच्छद्भिः सर्वैरेव कुरुकुलस्य निधनं प्रतिज्ञातम्। लोके ऽपि च धार्तराष्ट्रकुलक्षयः किं लज्जाकरो भवताम्। अपि च रे मूर्ख।

युष्मान्क्षेपयति क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम् ॥ १७ ॥

द्रौपदी। ज्ञानान्तिकम्। णाह णा लज्जन्ति एदे तुमं बि दाव मा विसुमरेहि।

भीमसेनः। वत्स कथं चिरयति पाञ्चाली।

सहदेवः। आर्य का खलु वेला तत्रभवत्याः प्राप्तायाः। किं तु रोषावेशवशादार्यागताप्यार्येण न लक्षिता।

भीमसेनः। दृष्ट्वा। देवि वर्धितामर्षैरस्माभिरागतापि भवती नोपलक्षिता। अतो न मन्युं कर्तुमर्हसि।

द्रौपदी। णाह उदासीणेसु तुम्हेसु मए णे उण कुविदेसु।

भीमसेनः। यद्येवमपगतपरिभवमात्मानं समर्थयस्व। हस्ते गृहीत्वा पार्श्वे समुपवेश्य मुखमवलोक्य। किं पुनरत्रभवतीमुद्विग्नामिवोपलक्षयामि।

द्रौपदी। णाह किं पि उव्वेअकालणं तुम्हेसु संणिहिदेसु।

भीमसेनः। किमिति नावेदयसि। केशानवलोक्य। अथवा किमावेदितेन।

जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेष्वपि।
पाञ्चालराजतनया वक्ते यदिमां दशाम् ॥ १८ ॥

द्रौपदी। कञ्चे बुद्धिमदिए णिवेदेहि दाव णाहस्स को अम्हो मह परिहवेण खिज्जदि।



Digitized by Google

चेटी। इदो वि अक्खिअं अज्ज मणुकालणं आसी देवीए।

भीमसेनः। किं नामास्माद्प्यधिकम्। तत्कथय कथय।

कौरव्यवंशदावे ऽस्मिन्क एष शलभायते।
मुक्तवेणीं स्पृशन्नेनां कृष्णां धूमशिखामिव॥ १९॥

चेटी। सुणादु कुमालो। अज्ज देवी अम्बासहिदा सुभद्दप्पमुहेण सबत्तिवग्गेण परिवुदा अज्जगन्धालीए पादवन्दणं काडुं गदा आसी।

भीमसेनः। युज्यत एवमेतत्। अभिवन्दनीया गुरवः।

चेटी। तदो पडिणिउत्तमाणा भाणुमदीए दिट्ठा।

भीमसेनः। आः। शत्रोर्भार्यया दृष्टा। युक्तं क्रोधस्थानम्। ततस्ततः।

चेटी। तदो ताए देविं पेक्खिअ सक्कोवअणदिक्खदिट्ठीए सगव्वं इसि विहसिअ भणिदं।

भीमसेनः। न केवलं दृष्टोक्ता च। अहो किं कुर्मः। ततस्ततः।

चेटी। अयि जणसेणि पञ्च गामा पत्थीअन्ति त्ति सुणीअदि कीस दाणिं वि दे केसा ण संजमीअन्ति।

भीमसेनः। सहदेव श्रुतम्।

सहदेवः। आर्य किमिहोच्यते। दुर्योधनकलत्रं हि सा। पश्य।

स्त्रीणां हि साहचर्याद्भवन्ति चेतांसि भर्तृसदृशानि।
मधुरापि हि मूर्छयते विषविटपि समाश्रिता वल्ली॥ २०॥

भीमसेनः। बुद्धिमतिके ततो देव्या किमभिहितम्।

चेटी। कुमाल जइ परिजणकीणा भवे तदो देवी भणादि।

भीमसेनः। किं पुनरभिहितं भवत्या।

चेटी। कुमाल मए एवं भणिदं। अयि भाणुमदि तुम्हाणं अमुक्केसु केसेसु कहं अम्हाणं देवीए केसा संजमीअन्ति त्ति।

Digitized by Google

भीमसेनः। सपरितोषम्। साधु बुद्धिमतिके साधु। तदभिहितं यदस्मत्परिजनोचितम्। स्वाभरणानि बुद्धिमतिकायै प्रयच्छति। अत्रभवति पाञ्चालराजतनये किं बहुना। श्रूयताम्। अचिरेणैव कालेन

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः॥ २१॥

द्रौपदी। किं णाह दुक्करं तुमि परिकुविदे अणुगेण्हदु एदं ववसिदं दे भादरो।

सहदेवः। अनुगृहीतमेतदस्माभिः।

नेपथ्ये महान्कलकलः।

सर्वे सविस्मयमाकर्णयन्ति।

भीमसेनः।

मन्थायस्तार्णवार्णःप्लुतिकुहरवलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुपतिनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितो ऽयम्॥२२॥

प्रविश्य संभ्रान्तः

कञ्चुकी। कुमार। एष खलु भगवान्वासुदेवः। सर्वे कृताञ्जलयः समुत्तिष्ठन्ति।

भीमसेनः। क्वासौ क्वासौ भगवान्।

कञ्चुकी। पाण्डवपक्षपातामर्षितेन सुयोधनेन संयमितुमारब्धः। सर्वे संभ्रमं नाटयन्ति।

भीमसेनः। किं संयतः।

Digitized by Google

कञ्चुकी। न हि न हि संयमितुमारब्धः।

भीमसेनः। किं कृतं देवेन।

कञ्चुकी। ततः स महात्मा दर्शितविश्वरूपतेजःसंपातमूर्छितमवधूय कुरुकुलमस्मच्छिविरसंनिवेशमनुप्राप्तः कुमारमविलम्बितं द्रष्टुमिच्छति।

भीमसेनः। सोपहासम्। किं नाम दुरात्मा सुयोधनो भगवन्तं संयमितुमिच्छति। आकाशे दत्तदृष्टिः। आः दुरात्मन्कुरुकुलपांसन। एवमतिक्रान्तमर्यादे त्वयि निमित्तमात्रेण पाण्डवक्रोधेन भवितव्यम्।

सहदेवः। आर्य किमसौ दुरात्मा सुयोधनो वासुदेवमपि भगवन्तं स्वेन रूपेण न जानाति।

भीमसेनः। वत्स मूढः खल्वयं दुरात्मा कथं जानातु। पश्य।

आत्मारामा विहितमतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते किमपि तमसां ज्योतिषां वा परस्ता-
त्तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम्॥ २३॥

आर्य मैत्रेय किमिदानीमध्यवस्यन्ति गुरवः।

कञ्चुकी। स्वयमेव गत्वा महाराजस्याध्यवसितं ज्ञास्यति कुमारः।

इति निष्क्रान्तः।

नेपथ्ये। कलकलानन्तरम्। भो भो द्रुपदविराटवृष्णयन्धकसहदेवप्रभृतयो ऽस्मद्दौहित्रीपतयः कौरवचमूप्रधानयोधाश्च शृणवन्तु भवन्तः।

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता।
तद्द्यूतारणिसंभृतं नृपवधूकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते॥ २४॥

Digitized by Google

भीमसेनः। आकर्ण्य सहर्षामर्षम्। जृम्भतां जृम्भतामप्रतिकृतप्रसरमार्यक्रोधज्योतिः।

द्रौपदी। णाह कहिं दाणिं एसो पलअजलहरघणाकुणिअमंसलो खणे खणे समरदुन्दुही ताडीअदि।

भीमसेनः। देवि किमन्यत्। यज्ञः प्रवर्तते।

द्रौपदी। को एसो जण्णो।

भीमसेनः। रणयज्ञः। तथा हि।

चत्वारो वयमृत्विजः स भगवान्कर्मोपदेष्टा हरिः
संग्रामाधरदीक्षितो नरपतिः पत्नी गृहीतव्रता।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः॥ २५॥

सहदेवः। आर्य गच्छामो वयमिदानीं गुरुजनानुज्ञाता विक्रमानुरूपमाचरितुम्।

भीमसेनः। एते वयमुद्यता एवार्यस्यानुज्ञामनुष्ठातुम्। उत्थाय। देवि गच्छामो वयमिदानीं कुरुकुलक्षयाय।

द्रौपदी आष्पं धारयन्ती। णाह असुरसमराहिमुहस्स हरिणो विअ मङ्गलं तुम्हाणं होदु।

चेटी। अय्यं च देवी भणादि। णाह तुम्हेहिं पुणो वि समरादो आअच्छिअ अहं आसासइदव्वा।

भीमसेनः। देवि किमिवालीकाश्वासनाभिः।

भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्॥ २६॥

द्रौपदी। णाह मा खु मा खु जण्णसेणीपरिहवदुद्दीविदकोवाणला

Digitized by Google

अणवेक्खिदसरीरा संचरिस्सदु जदो अप्पमत्तसंचरणिज्जाइं रिउबलाइं सुणीअन्ति।

भीमसेनः। शृणु सुव्रत्रिये समर्था वयं संक्रमितुम्।

अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के
मग्नानां स्यन्दनानामुपरि कृतपदन्यासविक्रान्तपत्तौ।
स्फीतासृक्यानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
संग्रामैकार्णवान्तः पयसि विचरितुं पण्डिताः पाण्डुपुत्राः ॥२७॥

इति निष्क्रान्ताः सर्वे।

॥ इति प्रथमोऽङ्कः ॥

Digitized by Google

ततः प्रविशति कञ्चुकी।

कञ्चुकी। आज्ञापितोऽस्मि महाराजदुर्योधनेन। विनयंधर गच्छ त्वं सत्वरमन्विष्यतां देवी भानुमती। अपि निवृत्ताम्बायाः पादवन्दनसमयान्न वेति। यतस्तां विलोक्य निकृताभिमन्यवो राधेयजयद्रथप्रभृतयः क्षत्रियाः समरभूमिं गत्वा सभाजयितव्या इति। तन्मया द्रुततरं गन्तव्यमिति। अहो प्रभविष्णुता महाराजस्य यन्मम जरसाभिभूतस्य मर्यादामात्रमेवावरोधनिवासः। अथवा किमिति जरामुपालभामहे यतः सर्वान्तःपुरिकाणामयमेव वैयवहारिको वेषश्चेष्टा च। तथा हि।

नोच्चैः सत्यपि चक्षुषीक्षितुमलं श्रुत्वापि नाकर्णितं
शक्तेनाप्यधिकार इत्यधिकृता यष्टिः समालम्ब्यते।
सर्वत्र स्खलितेषु दत्तमनसा यातं मया नोद्धतं
सेवास्वीकृतजीवितस्य जरसा किं नाम यन्मे कृतम्॥ २८॥

परिक्रम्य दृष्ट्वा। आकाशे। विहंगिके। अपि श्वश्रूजनपादवन्दनं कृत्वा प्रतिनिवृत्ता भानुमती। कर्णौ दत्त्वा। किं कथयसि। आर्य। एषा भानुमती देवी पत्युः समरविजयाशंसया निर्वर्तितगुरुपादवन्दनाद्यप्रभृत्यारब्धनियमा देवगृहे बालोद्याने तिष्ठतीति। तद्गच्छ त्वमात्मव्यापाराय यावदहमप्यत्रस्थां

Digitized by Google

देवीं महाराजस्य निवेदयामीति। परिक्रम्य। साधु पतिव्रते साधु। स्त्रीस्वभावेऽपि वर्तमाना वरं भवती न पुनर्महाराजः। योऽयमुच्यतेषु बलवत्स्वबलवत्सु वासुदेवमहायेषु पाण्डुपुत्रेष्वरिष्वप्याप्तःपुरविकारमनुभवति। विचिन्त्य। इदमयथातथं स्वामिनश्चेष्टितम्। कुतः।

आ शस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने-
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्यायमरातिलूनधनुषः प्रीतो ऽभिमन्योर्वधात्॥ २१॥

सर्वथा दैवं नः स्वस्ति करिष्यतीति। तद्यावदन्त्रस्थां देवीं महाराजस्य निवेदयामि। इति निष्क्रान्तः।

॥ विष्कम्भकः॥

ततः प्रविश्यासनस्था भानुमती सखी चेटी च।

सखी। सहि भाणुमदि कीस दाणिं तुमं सिबिणअदंसणमेत्तस्स किदे अहिमाणिणो महाराअदुज्जोहणस्स महिसी भविअ एवं विअलिअधीरभावा अतिमेत्तं संतप्पसि।

चेटी। भट्टिणि सोहणं भणादि सुवअणा।

भानुमती। एवं णोदं।

चेटी। सिबिणअन्तो जणो किं ण हु किंल पि ण पबदि।

भानुमती। हञ्जे एवं णोदं किं उण इदं मे अकुसलदंसणं पडिभादि सिबिणअं।

सखी। पिअसहि जइ एवं ता कहेहि सिबिणअं जं अम्हे बि पडिस्सा-

वअन्तीओ धम्मप्पसंसाए देवदासंकित्तणेण डुवादिपडिग्गहेण अ पडिच्छिस्सामो।

चेटी। सोहणं खु भणादि सुवअणा अकुसलदंसणा सिविणआ देवदाणं पसंसाए कुसलपरिणामा होन्ति त्ति सुणीअदि।

भानुमती। जइ एवं ता कहइस्सं अवहिदा दाव होहि।

सखी। अवहिदम्हि कहेदु पिअसही।

भानुमती। अज्ज किल मे पमदवणे आसीणाए केण वि अदिसइद-दिव्वरूवेण णउलेण अक्खिसदं वाआदिदं। उभे आत्मगतमवधार्य।

सखी। सत्तं पाबं सत्तं पाबं पडिच्छदं अमङ्गलं। प्रकाशम्। देवि तदो तदो।

भानुमती। हला भणे विसुमरिदम्हि ता चिट्ठ जाव सवं सुमरिअ कहइस्सं। इति चिन्तां नाटयति।

ततः प्रविशति दुर्योधनः कञ्चुकी च।

दुर्योधनः। सूक्तमिदं कस्यचित्।

2 3 गुण्या सान्नान्यकानल्पः स्वयमन्येन वा कृतः।
करोति महतीं प्रीतिमपकारो ऽपकारिषु ॥ ३० ॥

येनाद्य द्रोणकर्णजयद्रथादिभिर्कृतमभिमन्युमुपश्रुत्योच्छ्वसितमिव नश्चेतसा।

कञ्चुकी। देव नेदमतिदुष्करमाचार्यशस्त्रप्रभावाणाम्। कर्णजयद्रथयोर्वा कात्र श्लाघा।

राजा। विनयंधर किमाह भवान्। एकाकी बहुभिर्बालो लूनशरासनश्च निकृत इति। पश्य।

2.4 कृते जरसि गाङ्गेये पुरस्कृत्य शिखण्डिनम्।
या श्लाघा पाण्डुपुत्राणां सैवास्माकं भविष्यति ॥ ३१ ॥



Digitized by Google

कञ्चुकी। देव नैवेदं कल्पयितुमर्हसि। किं तु तव पौरुषप्रतीघातो ऽस्माभिर्नावलोचितपूर्व इति यत एवं ब्रवीमि।

राजा। एवमिदम्।

2.5. सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम्॥ ३२॥

कञ्चुकी। कर्णौ पिधाय सभयम्। शान्तं पापं शान्तं पापम्।

राजा। विनयंधर किं मयोक्तम्।

कञ्चुकी। सहभृत्यगणमिति पठति। एतद्विपरीतमभिहितं देवेन।

राजा। विनयंधर। अद्य खलु भानुमती यथापूर्वमात्मानमनामन्त्र्य वासभवनात्प्रातरेव निष्क्रान्तेत्याक्षिप्तं मे मनः। तदादेशय तमुद्देशं यत्रस्था भानुमती।

कञ्चुकी। इत एतु देवः। ओं परिक्रामतः।

कञ्चुकी। पुरो ऽवलोक्य समन्ततो गन्धमाघ्राय। पश्य पश्य। एतत्तुहिनकणाशिशिरसमीरणोद्वेल्लितबन्धनच्युतशेफालिकाविरचितकुसुमप्रकरमीषदालोहितमुग्धवधूकपोलपाटललोध्रप्रसूनविजितश्यामलतासौभाग्यमुन्मीलितवकुलकुन्दकुसुमसुरभिशीतलं प्रभातकालरमणीयमद्यतस्ते बालोद्यानम्। तथा हि।

2.6 प्रालेयमिश्रमकरन्दकरालकोशैः
पुष्पैः समं निपतिता रजनीप्रबुद्धैः।
अर्काश्रुभिन्नमुकुलोदरसान्द्रगन्ध-
संसूचितानि कमलान्यलयः पतन्ति॥ ३३॥

राजा। विनयंधर। इदमपरममुष्मिन्नुषसि रमणीयतरम्। पश्य।

2.7. जृम्भारम्भप्रवितनदलोपान्तजालप्रविष्टै-

Digitized by Google

कैस्तेभानोर्नृपतय इव स्पृश्यमाना विबुद्धाः।
स्त्रीभिः सार्धं घनपरिमलस्तोकलक्ष्याङ्गरागा
मुञ्चन्त्येते विकचनलिनीगर्भशय्यां द्विरेफाः ॥ ३४ ॥

कञ्चुकी। देव नन्वेषा भानुमती सुवदनया तरलिकया च पर्युपास्यमाना तिष्ठति। तदुपसर्पतु देवः।

राजा। दृष्ट्वा। विनयंधर गच्छ त्वं सांग्रामिकं रथमुपकल्पयितुम्। अहमप्येष देवीं दृष्ट्वानुपदमागत एव।

कञ्चुकी। एष कृतो देवादेशः। इति निष्क्रान्तः।

सखी। पिअसहि अबि सुमरिदं तुए।

भानुमती। सहि सुमरिदं। अज्ज किल पमदवणे आसीणाए मम अग्गदो केण बि अदिसइददिव्वरूवेण णउलेण अक्खिसदं वाबादिदं।

उभे। अवधार्यात्मगतम्। सत्तं पाबं सत्तं पाबं। प्रकाशम्। तदो तदो।

भानुमती। संदाबावगओअहिअआए पुणो बि मए विसुमरिदं।

राजा। अहो देवी भानुमती सुवदनातरलिकाभ्यां सह किमपि मन्त्रयमाणा तिष्ठति। भवत्वनेन लताजालेनान्तरितः शृणोमि तावदासां विश्रब्धालापम्। तथास्थितः।

सखी। अलं संदाबेण कहेदु पिअसही।

राजा। किं नु खल्वस्याः संतापकारणम्। अथवानामन्त्र्य मामियमस्य वासभवनान्निष्क्रान्तेति समर्थित एवास्या मया कोपः। अयि भानुमति। अविषयः खलु दुर्योधनो भवत्याः कोपस्य।

2.2 किं कण्ठे शिथिलीकृतो भुजलतापाशः प्रमादान्मया
निद्राच्छेदविवर्तनेष्वभिमुखी नाद्यापि संभाविता।
अन्यस्त्रीजनसंकथालघुरहं स्वप्ने त्वया लक्षितो

Digitized by Google

दोषं पश्यसि किं प्रिये परिजनोपालम्भयोग्ये मयि ॥ ३५ ॥

विचिन्त्य। अथवा।

2.9. इयमस्मदुपाश्रयैकचित्ता मनसा प्रेमनिबद्धमत्सरेण।
नियतं कुपितातिवल्लभत्वात्स्वयमुत्प्रेक्ष्य ममापराधलेशम् ॥ ३६ ॥

तथापि किं वक्ष्यतीति शृणुमस्तावत्।

भानुमती। हला हला तदो तस्स अदिसइ्ददिव्वरूविणो णउलस्स दंसणेण उस्सुआ जादा।

राजा। किं नामातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता। तत्किमनया माद्रीसुतानुरक्तया वयमेव विप्रलब्धाः। सोत्प्रेक्षम्। इयमस्मदिति पठित्वा। मूढ दुर्योधन कुलटाविप्रलभ्यमात्मानं बहुमन्यमानोऽधुना किं न वक्ष्यसि। तदर्थमेवास्याः प्रातरेव विविक्तस्थानाभिलाषः सखीजनकथासु च पक्षपातः। दुर्योधनस्तु मोहादविज्ञातबन्धकीहृदयसारः क्वापि परिभ्रान्तः। आः पापेऽस्मत्परिग्रहपांसनि।

2.10 तद्भीरुत्वं तव मम पुरः साहसानीदृशानि
श्लाघा सास्मद्रिपुषि विनयव्युत्क्रमेऽप्येष रागः।
तच्चौदार्यं मयि जडमतौ चापले कोऽपि पन्थाः
ख्याते तस्मिन्वितमसि कुले जन्म कौलीनमेतत् ॥ ३७ ॥

सखी। तदो तदो।

भानुमती। तदो अहं तुरिदं आसणादो उट्ठाणं एदं लदामण्डवं पविट्ठा। तदो सो मं अणुसरन्तो एव्व लदामण्डवं पविट्ठो।

राजा। अहो कुलटोचितमेतस्याः पापायाः पापशीलत्वम्।

2.11 यस्मिंश्चिरप्रणयनिर्भरबालभाव-

Digitized by Google

मावेदितो रहसि मत्सुरतोपभोगः।
तत्रैव दुश्चरितमद्य निवेदयन्ती
व्रीतासि पापहृदये न सखीजने ऽस्मिन् ॥ ३८ ॥

उभे। तदो तदो।

भानुमती। तदो तेण सगव्वपसारिअकरेण अवहरिअं मे थणंसुअं।

राजा। विचिन्य। सगर्वप्रसारितकरेण हृतं मे स्तनांशुकम्। सक्रोधम्। अलमतः परं श्रुत्वा। भवतु तावत्तस्य परवनितास्कन्दनप्रगल्भस्य माद्रीसुतस्य जीवितमपहरामि। किंचिदुत्वा विचिन्य। अथवा। इयमेव तावत्पापशीला प्रथममनुशासनीया। इति निवर्तते।

उभे। तदो तदो।

भानुमती। हला तदो हं अज्जउत्तस्स पभादमङ्गलतूररवमिस्सेण वारविलासिणीसंगीदसद्देण पडिबोधिदम्हि।

राजा। किं न खलु प्रतिबोधितास्मीति स्वप्नदर्शनमनया वर्णितम्। विचिन्य। भवतु सखीवचनाद्यक्तिर्भविष्यति।

उभे सविषादमन्योन्यं पश्यतः।

सुवदना। जं किं बि अज्जाकिदं तं भाईरहीपमुहाणं णईणं सलिलेन अवहरीअदु भअवदाणं बम्हणाणं बि आसीसाए आहुदिहुदेण पज्जलिदेण भअवदा हुदासणेण दड्ढदु।

राजा। अलं विकल्पेन स्वप्नदर्शनमेवैतदनया वर्णितम्। मया पुनर्मन्दधियान्यथैव संभावितम्।

2.12 दिष्ट्यार्धश्रुतविप्रलम्भजनितक्रोधादहं नो गतो
दिष्ट्या नो परुषं रुषार्धकथने किंचिन्मया व्याकृतम्।
मां प्रत्याययितुं विमूढहृदयं दिष्ट्या कथान्तं गता

Digitized by Google

मिथ्यादूषितयानया विरहितं दिष्ट्या न ज्ञातं जगत् ॥ ३१ ॥

भानुमती। हला कहेहि किं एत्थ सुहसूअअं।

सखी चेटी चान्योन्यमवलोक्य।

सखी। अपवार्य। एत्थ णत्थि थोअं बि सुहसूअअं। जइ एत्थ अत्तीअं कहइस्सं अबराहिणी भविस्सं। सो दाणिं सिणिद्धो जणो जो पुच्छिदो परुसं बि हिदं भणादि। प्रकाशम्। सहि सव्वं एव्व एदं असुहणिवेदणं ता देवदाणं पणामेण डुव्वादिपडिग्गहेण अ अत्तरोअडु। ण हु दाढिणो णउलस्स अप्पस्स वा दंसणं अहिसद्दवहं बि सिविणए पसंसन्ति विअक्खणा।

राजा। अवितथमाह सुवदना नकुलेन पन्नगशतवधः स्तनांशुकाहरणमिति नियतमनिष्टोदर्कं तर्कयामि।

2.13 पर्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥ ४० ॥

आत्मानिस्पन्दनं सूचयित्वा। आः ममापि नाम दुर्योधनस्यानिमित्तानि हृदयक्षोभमावेदयन्ति। सावष्टम्भम्। अथवा भीरुजनहृदयप्रकम्पनेषु का गणना दुर्योधनस्यैवंविधेषु। गीतश्चायमर्थो ऽङ्गिरसा।

2.14 ग्रहाणां चरितं स्वप्नो निमित्तान्युपयाचितम्।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥ ४१ ।

तदनुमत्याः स्त्रीस्वभावसुलभामलीकां शङ्कामपनयामि।

भानुमती। हला सुवअणे उदअगिरिसिहरन्तरिदविमुक्करुवरो विअलिअसंकाराअप्पसण्णदुरालोअमण्डलो जादो भअवं दिअहणाहो।

चेटी। भट्टिणि रोसाणिदकणअकन्तिसस्सिरीएण लहाजालन्तरोवइदकिरणजालेण पिञ्जरिदुज्जाणभूमिभाओ पूरिअपइण्णो विअ रिऊ दुप्पे-

Digitized by Google

कवणिज्जो भअवं सहस्सरस्सी संवुत्तो ता समओ दे लोद्दिदचन्दणकुसुमगब्भेण अग्घेण पज्जवट्टादुं।

भानुमती। हला तरलिए उवणेहि मे अग्घभाअणं जाव भअवदो सहस्सकिरणस्स सबरिअं णिवत्तेमि।

चेटी। जं देवी आणवेदि। इति निष्क्रम्य पुनः प्रविश्य। भट्टिणि इमं अग्घभाअणं णिवत्तेदु भअवदो सहस्सरस्सिणो सबरिअं।

राजा। अयमेव साधुतरो ऽवसरः प्रियासमीपमुपगन्तुम्। इत्युपसर्पति।

सखी। विलोक्यात्मगतम्। कहं महाराओ आअदो हुत्त जादो से णिअमभङ्गो।

भानुमती। दिनकराभिमुखी भूत्वा। भअवं अम्बरमहासरेकुसहस्सपत्त पुव्वदिहावङ्कुमुहमण्डणाकुङ्कुमविसेसअ सअलभुअणेक्करअणप्पदीब जं एत्थ सिबिणअदंसणे किं बि अत्थाहिदं तं भअवदो पणामेण सभाडुअस्स अज्जउत्तस्स कुसलपरिणामीभोदु। अर्घं दत्त्वा। हञ्जे तरलिए उवणेहि मे कुसुमाइं अबराणं बि देवदाणं सबरिअं णिवत्तेदुं। हस्तौ प्रसारयति।

राज्ञा संज्ञया परिजनमुत्सार्य पुष्पाणि स्वयमुपनयति। स्पर्शसुखमभिनीय कुसुमानि भूमौ पातयति।

भानुमती। सरोषम्। अहो पमादो परिअणस्स। परिणिवृत्य राजानमवलोक्य सस्साध्वसं लज्जां नाटयति।

राजा। देवि। अनिपुणः परिजनो ऽयमेवंविधे सेवावकाशे तथा प्रभवत्यनुशासने देवी। अये प्रिये।

2.15

विकिर धवलदीर्घापाङ्गसंसर्पि चक्षुः
परिजनपथवर्तिन्यत्र किं संभ्रमेण।
स्मितमधुरमुदारं देवि मामालपोच्चैः
प्रभवति मम पाणयोरञ्जलिः सेवितुं त्वाम्॥ ४२॥

Digitized by Google

भानुमती। अब्भणुज्जाणाहु मं महाराओ अत्थि मे कस्सिं वि णिअमे अक्खिलासो।

राज्ञा। श्रुतविस्तार एवास्मि भवत्याः स्वप्रवृत्तान्तं प्रति तदलं प्रकृति-सुकुमारमात्मानं खेदयितुम्।

भानुमती। अज्जउत्त अदिमत्तं मे सङ्का बाहेइ ता अणुमण्णाहु मं अज्ज-उत्तो।

राज्ञा। साधु। देवि। अलमनया शङ्कया। पश्य।

किं नो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं
किं द्रोणेन किमङ्गराजविशिखैरेवं यदि श्लाघ्यसि।
भीरु भ्रातृशतस्य मे भुजवनच्छायां सुखोपस्थिता
त्वं दुर्योधनकेशरीन्द्रगृहिणी शङ्कास्पदं किं तव ॥ ४३ ॥

भानुमती। अज्जउत्त ण हु किं वि मे सङ्काकालणं तुम्हेसु संणिहिदेसु किं तु अज्जउत्तस्स एवं मणोरहसंपत्तिं अभिणन्दामि।

राजा। अयि सुन्दरि। एतावत्त एव मनोरथा यदहं दयितया संगतः स्वेच्छया विहरामि। पश्य।

प्रेमाबन्धस्तिमितनयनापीयमानाब्जशोभं
लज्जायोगादविशदकथं मन्दमन्दस्मितं वा।
वक्त्रेन्दुं ते नियममुषितालक्तकाग्राधरं वा
पातुं वाञ्छा परमसुलभं किं नु दुर्योधनस्य ॥ ४४ ॥

नेपथ्ये महान्कलकलः। सर्वे आकर्णयन्ति।

भानुमती। राजानं परिष्वज्य। परित्ताअदु परित्ताअदु अज्जउत्तो।

राजा। समन्तादवलोक्य। अलं प्रिये संभ्रमेण। पश्य।

दिक्षु व्यूढाङ्घ्रिपाङ्क्तस्तृणजटिलचलत्पांशुदण्डो ऽत्तरिक्षे

कात्कारी शर्कराल: पथिषु विटपिनां स्कन्धकाषैः सधूमः।
प्रासादानां निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर-
श्चण्डारम्भः समीरो वहति परिदिशं भीरु किं संभ्रमेण ॥ ४५ ॥

सखी। महाराओ पविसदु एदं दारुपव्वअपासादं उच्चेअकारी खु अअं उत्थिदपरुसरअकलुसीकदणअणो विअलिअतरुवरसद्दवित्तत्थमन्तुरापरिब्भट्ठवल्लकुतुलंगमो पज्जाउलीकिदजणपट्ठई भीसणो समीरणासारो।

राजा। उपकारि खल्विदं वात्याचक्रं सुयोधनस्य यस्य प्रसादादयत्नपरित्यक्तनियमया देव्या संपादितो ऽस्मन्मनोरथः। कथमिति।

२.१९ न्यस्ता न भृकुटिर्न बाष्पसलिलैराच्छादिते लोचने
नीतं नाननमन्यतः सशपथं नाहं स्पृशन्वारितः।
तन्व्या मग्नपयोधरं भयवशादाविद्धमालिङ्गितो
भङ्गास्या नियमस्य भीषणमरुन्नायं वयस्यो नु मे ॥ ४६ ॥

तत्संपूर्णमनोरथस्य मे कामचारः संप्रति विहारेषु तदितो दारुपर्वतमेव गच्छामः।

सर्वे वात्याबाधां रूपयन्तो यत्नतः परिक्रामन्ति।

राजा।

२.२० कुरु घनोरु पदानि शनैः शनै-
रपि विमुञ्च गतिं परिवेपिनीम्।
पतसि बाहुलतोपनिबन्धनं
मम निपीडय गाढमुरःस्थलम् ॥ ४७ ॥

प्रवेशं रूपयित्वा। अलब्धान्तरः समीरणः संवृतत्वाद्गर्भगृहस्य। विश्रब्धमुन्मील्य चक्षुरुन्मृष्टरेणुनिकरम्।



Digitized by Google

भानुमती। सहर्षम्। दिट्ठिआ उप्पादसमीरणासारो ण बाधेदि।

सखी। मक्काराअ आरोक्कणसंभमणिस्सहं पिअसहीए ऊरुजुअलं ता कीस दाणिं मक्काराओ आसणवेदिं ण अणुभूसेदि।

राजा। देवीमवलोक्य। भवति। अनल्पमेवापकृतं वात्यासंभ्रमेण। तथा हि।

रेणुर्बाधां विधत्ते तनुरपि मरुतीं नेत्रयोरायतत्वा-
दुत्कम्पोऽल्पोऽपि पीनस्तनभरितमुरःक्षिप्तहारं दुनोति।
ऊर्वोर्मन्देऽपि याते पृथुजघनभराद्वेपथुर्वर्धतेऽस्या
वात्या खेदं कृशाङ्ग्याः सुचिरमवयवैर्दत्तहस्ता करोति ॥ ४८ ॥

सर्व उपविशन्ति।

राजा। तत्किमित्यनास्तीर्णं कठिनशिलातलमध्यास्ते देवी।

लोलांशुकस्य पवनाकुलितांशुकान्तं
त्वद्दृष्टिहारि मम लोचनबान्धवस्य।
अध्यासितुं तव चिरं जघनस्थलस्य
पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥ ४९ ॥

प्रविश्य संभ्रान्तः

कञ्चुकी। देव भग्गं भग्गम्। सर्वे सातङ्कं पश्यन्ति।

राजा। किं नाम।

कञ्चुकी। देव भग्गं भीमेन।

राजा। आः किं प्रलपसि।

भानुमती। अज्ज किं अणत्थं मन्तेसि।

कञ्चुकी। सभयम्। देव कथयामि सर्वम्।

भग्गं भीमेन भवतो मरुता रथकेतनम्।

Digitized by Google

पतितं किङ्किणीक्षाणबद्धाक्रन्दमिव क्षितौ । ५० ॥

राजा। बलवत्समीरणवेगात्कम्पिते भुवने भग्नः स्यन्दनकेतुः तत्किमित्युद्धतं प्रलपसि भग्नं भग्नमिति।

कञ्चुकी। देव न किंचित्। किं तु शमनार्थमस्यानिमित्तस्य विज्ञापयितव्यो देव इति स्वामिभक्तिर्मां मुखरयति।

भानुमती। अज्जउत्त पडिक्खीअदु एअं अणिमित्तं पसमाबम्क्णवेआणुघोसेण होमेण अ।

राजा। सावज्ञम्। किं तु सूतपुरोहिताय सुमित्राय निवेदय।

कञ्चुकी। यदाज्ञापयति देवः। इति निष्क्रान्तः।

प्रविश्य

प्रतिहारी। सोद्वेगमुपसृत्य। जअदु जअदु महाराओ। महाराअ एसा खु जामादुणो सिन्धुराअस्स मादा वङ्क दुस्सला अ पडिहारभूमीए चिट्ठदि।

राजा। स्वगतम्। किं जयद्रथमाता दुःशला चेति क्वाचिदभिमन्युवधामर्षितैः पाण्डुपुत्रैर्न कश्चिदत्याहितमाचेष्टितं भवेत्। प्रकाशम्। गच्छ प्रवेशय शीघ्रम्।

प्रतिहारी। जं महाराओ आणवेदि। इति निष्क्रान्ता।

ततः प्रविशति संभ्रान्ता जयद्रथमाता दुःशला च। उभे सामं दुर्योधनस्य पादयोः पतनतः।

माता। परित्ताअदु परित्ताअदु कुरुणाहो। दुःशला रोदिति।

राजा। ससंभ्रममुत्थाप्य। अम्ब समाश्वसिहि समाश्वसिहि किमत्याहितम्। अपि कुशलं समराङ्गनेघप्रतिरथस्य जयद्रथस्य।

माता। जाद कुदो कुसलं।

राजा। कथमिव।

माता। साशङ्कम्। अज्ज खु पुत्तवक्कामरिसुद्दीबिदेण गण्डीविणा अणत्थ-

Digitized by Google

मिदं दिअसणाकं तस्स वक्को पडिच्छादो।

राज्ञा। सस्मितम्। इदं तदश्रुकारणमम्बायाः दुःशलायाश्च। पुत्रशोकादुत्तप्तस्य किरीटिनः प्रलापैरेवमवस्था। अहो मुग्धत्वमबलानाम्। अम्ब कृतं विषादेन। वत्से दुःशले ऽलमश्रुपातेन। कुतश्चायमस्य धनंजयस्य प्रभावो दुर्योधनबाहुपरिघरक्षितस्य महारथशतयद्गथस्य विपत्तिमुत्पादयितुम्।

माता। ज्जाद ज्जदो अ बन्धुवक्कामरिसुद्दीविद्कोवाणला अणवेक्खिदसरीरा वीरा परिक्कमन्ति।

राज्ञा। सोपहासम्। एवमेतत्। सर्वजनप्रसिद्धमेवामर्षित्वं पाण्डवानाम्। पश्य।

कृत्ताकृष्टविलोलकेशवसना दुःशासनेनाग्रजा
पाञ्चाली मम राजचक्रमभितो गौर्गौरिति व्याकृता।
तस्मिन्नेव स किं नु गाण्डवधरो नासोत्पृथानन्दनो
यूनः क्षत्रियवंशजस्य कृतिनः क्रोधास्पदं किं न तत्॥ ५१॥

माता। असमत्तपडिच्छाभरस्स अप्पवक्को से पडिच्छादो।

राज्ञा। यद्येवमलमानन्दस्थाने ऽपि ते विषादेन। ननु वक्तव्यमुत्सन्नः सानुजो युधिष्ठिर इति। मातर्न शक्तिरस्ति धनंजयस्य वान्यस्य कुरुशतपरिवारवर्धितमहिम्नः कृपकर्णद्रोणाश्वत्थामादिमहारथद्विगुणीकृतनिरावरणविक्रमस्य नामापि ग्रहीतुं ते तनयस्य। अयि सुतपराक्रमानभिज्ञे।

धर्मात्मजं प्रति यमौ च कथैव नास्ति
मध्ये वृकोदरकिरीटभृतोर्बलेन।
एको ऽपि विस्फुरितमण्डलचापचक्रं

Digitized by Google

कः सिन्धुराजमभिषेणयितुं समर्थः ॥ ५२ ॥

भानुमतो। अज्जउत्त जइ वि एवं तह वि गुरुकिदपडिस्साभरो धनंजओ णिदाणं खु सङ्काए।

माता। जादे साङ्कं कालोइदं तुए मन्तिदं।

राजा। आः ममापि नाम दुर्योधनस्य शङ्कास्थानं पाण्डवाः। पश्य।

2.26 कोदण्डज्याकिणाङ्किरगणितरिपुभिः कङ्कटामुक्तदंशैः
श्लिष्टान्योन्यातपत्रैः सितकमलवनभ्रान्तिमुत्पादयद्भिः।
रेणुग्रस्तार्कभासां प्रचलदसिलतादन्तुराणां चमूना-
माक्रान्ता भ्रातृभिर्मे दिशि दिशि समरे कोटयः संपतन्ति ॥ ५३ ॥

अविज्ञातपाण्डवप्रभावे किं त्वमप्येवमाशङ्कसे। पश्य।

2.27 दुःशासनस्य हृदयक्षतजाम्बुपाने
दुर्योधनस्य च यथा गदयोरुभङ्गे।
तेजस्विनां समरमूर्धनि पाण्डवानां
ज्ञेया जयद्रथवधेऽपि तथा प्रतिज्ञा ॥ ५४ ॥

कः को ऽत्र भोः। क्षत्रं मे रथमुपपादय तावद्यावदहमपि तस्याप्रगल्भस्य पाण्डवस्य जयद्रथपरिरक्षणेन मिथ्याप्रतिज्ञाविलक्ष्यसंपादितमशस्त्रपूतं मरणमुपदिशामि।

प्रविश्य

कञ्चुकी। देव।

2.28 उद्घातक्षणितविलोलकेमघण्टः
प्रालम्बद्विगुणितचामरप्रकाशः।
सज्जो ऽयं नियमितवल्गिताकुलाश्वः
शत्रूणां क्षपितमनोरथो रथस्ते ॥ ५५ ॥

Digitized by Google

राजा। देवि प्रविश त्वमभ्यन्तरमेव यावदहमपि तस्याप्रगल्भस्य।

इत्यादि पठित्वा परिक्रामति।

इति निष्क्रान्ताः सर्वे।

॥ इति द्वितीयो ऽङ्कः ॥

Digitized by Google

ततः प्रविशति विकृतवेषा राक्षसी।

राक्षसी। विकृतं विहस्य सपरितोषम्।

3.1 रुदमाणुशमंशभोअणे कुम्भशरुशवशाकि शंचिदे।
अणिशं अ पिबामि शोणिअं वलिशशदं शमले रुविश्शदि ॥५६॥

नृत्यन्ती सपरितोषम्। णइ शिन्धुलाअवरुदिअरे विअ शमलकम्म पडिबज्जइ अज्जुणो तदो अ पज्जत्तभलिदगोरुागाले मंशशोणिएकिं मे गेरे रुवीअदि। परिक्रम्य दिशो ऽवलोक्य। अरु कहिं णु लुक्किलप्पिए रुवीअदि। ता णाव इमशिशं शमले पिअभत्तालं लुक्किलप्पिअं अप्पेशामि। परिक्रम्य। होदु शद्दाबइश्शं दाव। लुक्किलप्पिआ लुक्किलप्पिआ इदो एकि इदो एकि।

ततः प्रविशति तथाविधो राक्षसः।

राक्षसः। श्रमं नाटयन्।

3.2. पच्चग्गरुदाणं मंशए णइ उणरे लुक्किले अ लम्भइ।
ता एशे मरु पलिश्शमे खणमेत्तं एव्व लरु णाश्शइ ॥५६॥

राक्षसी पुनर्व्याहरति।

राक्षसः। आकर्ण्य। अले के एशे मं शद्दाबेदि। विलोक्य। अले कहं वशागन्धा। उपसृत्य। वशागन्धे मं कीश शद्दाबेशि।

राक्षसी। लुक्किलप्पिआ एदं क्खु तुरु कालणादो पच्चग्गरुदश्श कश्श

Digitized by Google

बि लाएशिणो शलीलावअवप्पङ्कदं पङ्कदवशाशिणेरुचिकूणं कोणरुं लुक्किलं अग्गमंशं च आणीदं ता पिबाहि णं।

राजसः सपरितोषम्। शाङ्क वशागन्धे शाङ्क शोकूणं किदं तुए वलि-अम्हि पिबाशिदे एदं कोशिणं लुक्किलं आणीदं।

राजसी। लुक्किलप्पिआ ईदिशे कदणालगअतुलंगमशोणिअवशाश-मुद्दुश्शंचले शमलाङ्कणे पडिब्भमन्ते तुमं पिबाशिअशि त्ति अच्चलिअं अच्चलिअं।

राजसः। सक्रोधम्। अले वशागन्धे। पुत्तघडुकूअशोअशंतत्तकिअअं शामिणिं किडम्बादेइं पेक्खिदुं गदम्हि।

राजसी। लुक्किलप्पिआ अज्ज बि शामिणीए किडिम्बादेईए घडु-कूअशोए ण उबशम्मदि।

राजसः। अइ कुदो शे उबशमे किं तु अक्किमणुवकूशोअशमाणडु-क्खाए शुभद्दादेवीए ज्ञाणशेणीए अ शमाशाशोअदि।

राजसी। लुक्किलप्पिआ गेण्ह तुमं एदं कत्थिशिलकबालशंचिअं अग्गमंशोबदंशं अ पिबाहि णवशोणिआशवं।

राजसः। तथा कृत्वा। वशागन्धे अरु किअप्पङ्कदं तुए शंचिअं लुक्किलं अग्गमंशं च।

राजसी। अले लुक्किलप्पिआ। पुव्वशंचिअं तुमं जेव्व जाणाशि णव-शंचिअं शिणु। भअद्दत्तशोणिअकुम्भे शिन्धुलाअवशाकुम्भे दुवे मच्छा-किबभूलिशशवशोमदत्तबल्कोअप्पमुक्काणं णालिन्दाणं पाकिदपुलि-शाणं च लुक्किलवशामंशशश्श घडा अबिणद्धमुक्का शक्कशशंकवा शन्ति मे गेहे।

राजसः। सपरितोषमालिङ्ग्य। शाङ्क शाङ्क अग्घलिणीए शाङ्क शाङ्क

इमिणा दे भुग्घलिणित्तणेण शामिणीए हिडिम्बादेवीए शंविकारेण अ पणट्ठं मे दालिदं।

राक्षसी। लुक्खिलप्पिआ केलिशे शामिणीए शंविकारे किदे।

राक्षसः। अज्ज अहं शामिणीए हिडिम्बादेईए शवक्कमाणं शद्दाविअ आणत्ते जह लुक्खिलप्पिआ अज्ज पक्कदि अज्जउत्तभीमशेणाश्श पिट्ठदो-णुपिट्ठं शमले आहिण्डिदव्वं त्ति। ता तश्श अणुमग्गगामिणो कदमाणु-शशोणिअणाईदंशणाप्पणट्ठबुभुक्खापिडाशश्श इह एव्व शंगमो तुमुलओ मे हुवीअदि तुमं बि विश्शद्धा भविअ लुक्खिलवशाहिं कुम्भशक्कश्शं शंचेहि।

राक्षसी। लुक्खिलप्पिआ किं णिमित्तं कुमालभीमशेणाश्श पिट्ठदोणु-पिट्ठं आहिण्डीअदि।

राक्षसः। वशागन्धे तेण शामिणा विओदलेण दुश्शाशणाश्श लुक्खिलं पाडुं पडिसादं तं च अम्हेहिं लक्खशेहिं अणुप्पविशिअ पादव्वं त्ति।

राक्षसी। सहर्षम्। शाहु शामिणीए शाहु। भुशंविकाणे मे भत्ता तुए कदे।

नेपथ्ये महान्कलकलः। ऊर्ध्वाकर्णायितः।

राक्षसी। आकर्ण्य ससंभ्रमम्। अले लुक्खिलप्पिआ किं णु क्खु एशे महन्ते कलअले भुणीअदि।

राक्षसः। दृष्ट्वा। कला वशागन्धे एशे क्खु धिट्ठजुम्मेण दोणे केशेशु आ-कड्ढिअ अशिबत्तेण वाबादीअदि।

राक्षसी। सहर्षम्। लुक्खिलप्पिआ लुक्खिलप्पिआ। अम्हे बि आगच्छिअ दोणाश्श लुक्खिलं पिबम्ह।

राक्षसः। सभयम्। वशागन्धे बम्हणाशोणिअं क्खु एअं गलअं दक्खन्ते



Digitized by Google

पविशदि ता किं एदिणा।

नेपथ्ये पुनः कलकलः।

राक्षसी। लुक्किलप्पिआ पुणो वि एशे मक्कते कलअले शुणीअदि।

राक्षसः। नेपथ्याभिमुखमवलोक्य। वशागन्धे एशे क्खु अश्शत्थामे आकड्ढि-दाशिबत्ते इदो एव्व आअच्छदि कदा वि डुबदभुदलोशेण अम्हे वि वा-बादइश्शदि। ता एक्कि शामिणीए क्खिडम्बादेईए आणत्तिं कलेम्ह।

इति निष्क्रान्तौ।

॥ प्रवेशकः ॥

ततः प्रविशत्युत्खातखड्गाः कलकलमाकर्णयन्तश्चत्वारो।

अश्वत्थामा।

3.3. महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरवानुकारी मुहुः।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतो ऽप्य समरोद्धुरयमभूतपूर्वः पुरः॥ ५७॥

विचिन्त्य। ध्रुवं गाण्डीविना सात्यकिना वृकोदरेण वा यौवनदर्पातिक्रा-न्तमर्यादेन परिकोपितस्तातः समुल्लङ्घ्य शिष्यप्रियतामात्मसदृशभावमा-चेष्टते। तथा हि।

3.4. यद्दुर्योधनपक्षपातसदृशं युक्तं यदस्त्राग्रहे
रामाल्लब्धसमस्तकेतिगुरुणो वीर्यस्य यत्सांप्रतम्।
लोके सर्वधनुष्मतामधिपतेर्यच्चानुरूपं रुषः

Digitized by Google

प्रारब्धं रिपुघस्मरेण नियतं तत्कर्म तातेन मे ॥ ५८ ॥

पृष्ठतो विलोक्य। तदलमिदानीं मम रथप्रतोदायानया। सशस्त्रश्चास्मि सज्ज-लजलधरप्रभाभासुरेण सुप्रग्रहविमलकलधौतत्सरुणा खड्गेन यावत्समर-भुवमवतरामि। परिक्रम्य। वामाक्षिस्पन्दनं सूचयित्वा। कथं ममापि नामाश्वत्थाम्नः समरमहोत्सवप्रमोदनिर्भरस्य तातविक्रमदर्शनलालसस्यानिमित्तानि स-मरगमनविघ्नमुत्पादयन्ति। भवतु गच्छामि। सावष्टम्भं परिक्रम्याग्रतो विलोक्य च। कथ-मवधीरितसकलज्ञात्रधर्माणामुत्सृष्टसत्पुरुषोचितलज्जावगुण्ठनानां वि-स्मृतस्वामिसत्कारलघुचेतसां द्विरदरथतुरंगमचरणचारिणामगणितकुव-लयः सदृशपराक्रमव्रतानां रणभूमेरपक्रामतामयं महान्नादो बलानाम्। निर्वर्ण्य। अहह का धिक्कष्टम्। एते कर्णादयो ऽपि महारथाः समरात्परा-ङ्मुखीभवन्ति। कथं नु तातादिष्ठितानां बलानामियमवस्था भवेत्। भवत्वेवं तावत्। भो भोः कौरवसेनासमुद्रवेलापरिपालनमहामहीधरा नरपतयः। कृतं समरपरित्यागसाहसेन।

3.5 यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितो ऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ॥ ५९ ॥

अपि च।

3.6 अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थिते ऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम्।
कर्णादीनां संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां
तातं चापद्वितीये वहति रणधुरां को भयस्यावकाशः ॥ ६० ॥

नेपथ्ये। कुतो ऽप्यापि ते तातः।

Digitized by Google

अश्वत्थामा। श्रुत्वा। किं ब्रूथ। कुतोऽप्यापि ते तात इति। आः क्षुद्रा भीरवः कथमेवं प्रलपतां वः सहस्रधा न दीर्णमनया जिह्वया।

दग्धुं विश्वं दरुणकिरणैर्नोदिता द्वादशार्का
वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्नाः।
क्षुण्णं मेघैर्न गगनतलं पुष्करावर्तकाद्यैः
पापं पापाः कथयत कथं शौर्यराशेः पितुर्मे॥ ६१॥

प्रविश्य संभ्रान्ताः सप्रहारः

सूतः। परित्रायतां परित्रायतां कुमारः। इति पादयोः पतति।

अश्वत्थामा। विलोक्य। अये कथं तातसारथिरश्वसेनः। आर्य त्रैलोक्यत्राणक्षमस्य तातस्य सारथिरसि किं मत्तः परित्राणमिच्छसि।

सूतः। उत्थाय सकरुणम्। कुतोऽप्यापि ते तातः।

अश्वत्थामा। सावेगम्। किं तात एव नास्ति।

सूतः। अथ किम्।

अश्वत्थामा। हा तात। इति मोहमुपगतः।

सूतः। समाश्वसिहि समाश्वसिहि कुमार।

अश्वत्थामा। लब्धसंज्ञः सास्रम्। हा तात हा सुतवत्सल हा लोकत्रयैकधनुर्धर हा जामदग्न्यास्त्रसर्वस्वप्रतिग्रहप्राणायिन्।

सूतः। अलमत्यन्तशोकावेगेन। वीरपुरुषोचितां विपत्तिमुपगते पितरि त्वमपि तदनुरूपेणैव वीर्येण शोकसागरमुत्तीर्य सुखीभव।

अश्वत्थामा। अश्रूणि विमुच्य। आर्य कथय कथय कथं तादृग्भुजवीर्यसागरस्तातोऽपि नामास्तमुपागतः।

किं भीमाद्रुरुदक्षिणां गुरुगदाद्वीमप्रियः प्राप्तवान्

सूतः। शान्तं पापं शान्तं पापम्।

अश्वत्थामा।

[b] अन्तेवासिदयालुरुज्झितनयेनासादितो जिष्णुना।

सूतः। कथमेवं भविष्यति।

अश्वत्थामा।

[c] गोविन्देन सुदर्शनस्य नियतं धारापथं प्रापितः

सूतः। एतदपि नास्ति।

अश्वत्थामा।

[d] शङ्के नापदमन्यतः खलु गुरोरेभ्यश्चतुर्थादहम्॥ ६२॥

सूतः। कुमार।

3.9. एते ऽपि तस्य कुपितस्य महास्त्रपाणेः
किं धूर्जटेरिव तुलामुपयान्ति संख्ये।
शोकोपरुद्धहृदयेन यदा तु शस्त्रं
त्यक्तं तदास्य विहितं रिपुणातिघोरम्॥ ६३॥

अश्वत्थामा। किं पुनः कारणं शोकस्यास्त्रपरित्यागस्य वा।

सूतः। ननु कुमार एव कारणम्।

अश्वत्थामा। कथमहमेव।

सूतः। श्रूयताम्। अश्रूणि विमुच्य।

3.10 अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्ता
स्वैरं शेते गज इति किल व्याहृतं सत्यवाचा।
तच्छ्रुत्वासौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच॥ ६४॥

अश्वत्थामा। हा तात हा सुतवत्सल हा वृथामदर्थपरित्यक्तजीवित हा शौर्यराशे हा शिष्यप्रिय हा युधिष्ठिरपक्षपातिन्। इति रोदिति।

Digitized by Google

सूतः। कुमार। अलमत्यन्तपरिदेवनकार्पण्येन।

अश्वत्थामा।

3. 11. श्रुत्वा वधं मम मृषा सुतवल्लभेन
तात त्वया सह शरीरसवो विमुक्ताः।
जीवाम्यहं पुनरयं भवता वियुक्तः
क्रूरेऽपि तन्मयि मुधा तव पक्षपातः ॥ ६५ ॥

इति मोहमुपगतः।

सूतः। समाश्वसितु समाश्वसितु कुमारः।

ततः प्रविशति सोद्वेगः

कृपः।

3. 12 धिक्सानुजं कुरुपतिं धिगजातशत्रुं
धिग्भूपतीन्विफलशस्त्रभृतो धिगस्मान्।
केशग्रहः खलु तदा द्रुपदात्मजाया
द्रोणस्य चाद्य लिखितैरिव वीक्षितो यैः ॥ ६६ ॥

तत्कथं नु खलु वत्सं द्रक्ष्याम्यश्वत्थामानम्। अथवा किमवत्सारगुरुचेतसि ज्ञातलोकस्थितौ तस्मिन्न खलु शोकावेगमहमाशङ्के। किं तु पितुः परिभवमसदृशमुपश्रुत्य किं व्यवस्यतीति न जाने। अथवा।

3. 13 एकस्य तावत्पाको ऽयं दारुणो भुवि वर्तते।
केशग्रहे द्वितीये ऽस्मिन्नूनं निःशेषिताः प्रजाः ॥ ६७ ॥

विभाव्य। तदयं वत्सस्तिष्ठति यावदुपसर्पामि। उपसृत्य ससंभ्रमम्। वत्स समाश्वसिहि समाश्वसिहि।

अश्वत्थामा। लब्धसंज्ञः सासम्। हा तात हा सकलभुवनैकगुरो। आकाशे। युधिष्ठिर युधिष्ठिर।

Digitized by Google

3.14 आ जन्मनो न वितथं भवता किलोक्तं
न द्वेष्टि यज्जनमतस्त्वमजातशत्रुः।
तातेगुरौ द्विजवरे मम भाग्यदोषा-
त्सर्वं तदेकपद एव कथं निरस्तम् ॥ ६८ ॥

सूतः। कुमार। एष ते मातुलः शारद्वतः पार्श्वे तिष्ठति।

अश्वत्थामा। पार्श्वं विलोक्य सबाष्पम्। मातुल मातुल।

3.15 गतो येनाद्य त्वं सह रणभुवं सैन्यपतिना
य एकः शूराणां गुरुसमरकण्डूनिकषणः।
परीक्षासाश्चित्राः सततमभवन्येन भवतः
स्वसुः श्लाघ्यो भर्ता क्व नु खलु स ते मातुल गतः ॥ ६९ ॥

कृपः। परिगतः। परिगन्तव्य एव भवान्। अलमत्यन्तशोकावेगेन।

अश्वत्थामा। मातुल परित्यक्तमेव मया परिदेवनम्। एषोऽहं सुत-वत्सलं तातमेवानुगच्छामि।

कृपः। वत्स। अनुपपन्नमीदृशं भवद्विधानाम्।

सूतः। कुमार। अलमतिसाहसेन।

अश्वत्थामा। आर्य किमुच्यते।

3.16 मद्वियोगभयात्तातः परलोकमितो गतः।
करोमि विरहं तस्य वत्सलस्य कथं पितुः ॥ ७० ॥

कृपः। वत्स यावदयं संसारस्तावत्प्रसिद्धैवेयं लोकयात्रा यत्पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीया इति। पश्य।

3.17 निवापाञ्जलिदानेन केतनैः श्राद्धकर्मभिः।
तस्योपकारे शक्तस्त्वं किं जीवन्किमुतान्यथा ॥ ७१ ॥

सूतः। आयुष्मन्। यदाह शारद्वतः।

Digitized by Google

अश्वत्थामा। आर्य सर्वमेवेदं किं त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः प्राणान्धारयितुं क्षणमपि। तदुच्छ्वासमि तमेवोद्देशं यत्र तादृशं पितरं द्रक्ष्यामि। उत्थिष्ठन्सर्वतोमालोक्य विचिन्त्य। अस्तमस्यापि शस्त्र-ग्रहणविध्यया। भगवञ्छस्त्र।

3.18 गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाग्र्यस्यासीन्न खलु तव कश्चिन्न विषयः।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥ ७२ ॥

परित्यक्तुमिच्छति।

नेपथ्ये। भो भो राजानः। कथमिह भवन्तः सर्वे गुरोः परिभवमसुना नृशंसेन प्रयुक्तमत्रभवतो भारद्वाजस्योपेक्षन्ते।

अश्वत्थामा। श्रवणपर्यं प्रानैः प्रानैः प्राणं स्पृशन्। किं गुरोर्भारद्वाजस्य परिभवः।

पुनर्नेपथ्ये।

3.19 आचार्यस्य त्रिभुवनगुरोर्न्यस्तशस्त्रस्य शोका-
दूद्रोणस्याजौ नयनसलिलक्षालितार्द्राननस्य।
मौलौ पाणिं पलितधवले न्यस्य कृत्वा नृशंसं
धृष्टद्युम्नः स्वशिविरमयं याति सर्वे सक्रुधम् ॥ ७३ ॥

अश्वत्थामा। सक्रोधं सकम्पं च कृपसूतौ दृष्ट्वा। किं नामेदम्।

3.20 प्रत्यक्षमात्तधनुषां मनुजेश्वराणां
प्रायोपवेशसदृशं शममास्थितस्य।
तातस्य मे पलितमौलिनिरस्तकाशे
व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥ ७४ ॥

कृपः। वत्स। एवं किल जनः कथयति।

Digitized by Google

अश्वत्थामा। किं तातस्य दुरात्मना परिमृष्टमभूच्छिरः।

सूतः। सभयम्। कुमार। आसीदयं तस्य तेजोराशेर्देवस्य नवावतारः परिभवस्य।

अश्वत्थामा। हा तात हा पुत्रप्रिय। मम मन्दभागधेयस्य कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणात्मा परिभावितः। अथवा।

3.21 परित्यक्ते देहे रणशिरसि शोकान्धमनसा
शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत्।
स्फुरद्दिव्यास्त्रौघप्रविणमदमत्तस्य च रिपो-
र्ममैवायं पादः शिरसि निहितस्तस्य न करः ॥ ७५ ॥

आः दुरात्मन्यात्मालापसद।

3.22 तातं शस्त्रत्यक्तविमुखं निश्चेयनोपलभ्य
त्यक्त्वा शङ्कां खलु विदधतः पाणिमस्योत्तमाङ्गे।
अश्वत्थामा करधृतधनुः पाण्डुपात्मालसेना-
तूलोत्क्षेपप्रलयपवनः किं न यातः स्मृतिं ते ॥ ७६ ॥

युधिष्ठिर युधिष्ठिर। अज्ञातशत्रो। अमिथ्यावादिन्धर्मपुत्र। सानुजस्य ते किमनेनापकृतम्। अथवा किमनेनालीकप्रकृतिनिष्प्रचेतसा। अर्जुन सात्यके बाह्लशालिन्वृकोदर माधव। युक्तं नाम भवतां सुरासुरमनुजलोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदसुतकलङ्केन मनुजपशुना स्पृश्यमानमुत्तमाङ्गमुपेक्षितुम्। अथवा सर्व एवैते पातकिनः किमेतैः।

3.23 कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-



Digitized by Google

मयमक्तमसृङ्मेदोमांसैः क्रोमि दिशां बलिम् ॥ ७७ ॥

कृपः। वत्स न किंचिन्न संभाव्यते भारद्वाजतुल्ये बाहुशालिनि दिव्यास्त्रग्रामकोविदे भवति।

अश्वत्थामा। भो भोः पाण्डवमत्स्यसोमकमागधेयाः क्षत्रियापसदाः।

3.24 पितुर्मूर्ध्नि स्पृष्टे ज्वलदनलभास्वत्परशुना
कृतं यद्रामेण श्रुतिमुपगतं तन्न भवताम्।
किमद्याश्वत्थामा तदरिरुधिरासारविधसं
न कर्म क्रोधान्धः प्रभवति विधातुं रणमुखे ॥ ७८ ॥

सूत। गच्छ त्वं सर्वोपकरणैः सांग्रामिकैः सर्वायुधैरुपेतं महाहवलक्षणं नामास्मत्स्यन्दनमुपनय।

सूतः। यदाज्ञापयति कुमारः। इति निष्क्रान्तः।

कृपः। वत्स। अवश्यप्रतिकर्तव्ये ऽस्मिन्दारुणे परिभवाग्नौ सर्वेषामस्माकं को ऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम्।

अश्वत्थामा। किमतः परम्।

कृपः। सेनापत्ये ऽभिषिक्तमत्रभवन्तमिच्छामि समरभुवमवतारयितुम्।

अश्वत्थामा। मातुल परतन्त्रमिदमकिंचित्करं च।

कृपः। वत्स न खलु परतन्त्रं नाकिंचित्करं च। पश्य।

3.25 भवेद्भीष्मद्रोणं हि धृतराष्ट्रबलं कथम्।
यदि तत्तुल्यकक्षो ऽत्र भवान्धुर्यो न युज्यते ॥ ७९ ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुं किं पुनर्युधिष्ठिरबलम्। तदेवं च मन्ये परिकल्पिताभिषेकोपकरणाः कौरवराजो न चिराद्भवामेवाभ्युपेक्षमाणास्तिष्ठतीति।

अश्वत्थामा। यद्येवं ब्रवीते मे परिभवानलदह्यमानमिदं चेतस्तत्प्र-

Digitized by Google

तीकारज्ञलावगाहनाय। तदहं गत्वा तातवधविषण्णमानसं कुरुपतिं सेनापत्यस्वयंग्रहणप्रणयसमाश्वासनया मन्दसंतापं करोमि।

कृपः। वत्स। एवमिदम्। अतस्तमेवोद्देशं गच्छावः। इति परिक्रामतः।

ततः प्रविशतः कर्णदुर्योधनौ।

दुर्योधनः। अङ्गराज।

3.26 तेजस्वी रिपुकृतबन्धुदुःखपारं
बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम्।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत्॥ ८०॥

अथवा सूक्तमिदमभियुक्तैः प्रकृतिर्दुस्त्यजेति। यतः शोकान्धचेतसा तेन विमुच्य क्षत्रधर्मकार्कश्यं द्विजातिसुलभो मार्दवपरिग्रहः कृतः।

कर्णः। राजन्कौरवेश्वर। न खल्विदमेवम्।

दुर्योधनः। कथं तर्हि।

कर्णः। एवं किल तस्याभिप्राय आसीत्। यथाश्वत्थामा मया पृथिवीराज्ये ऽभिषेक्तव्य इति तस्याभावाद्वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहणमिति तथा कृतवान्।

दुर्योधनः। सप्रियंकम्पम्। एवमिदम्।

कर्णः। एतदर्थं च कौरवपाण्डवपक्षपातप्रवृत्तमहासंग्रामस्य राजकस्य परस्परक्षयमुपेक्षमाणेन तेन प्रधानपुरुषवध उपेक्षा कृता।

दुर्योधनः। उपपन्नमिदम्।

कर्णः। अन्यच्च राजन्। द्रुपदेन चास्य बाल्यात्प्रभृत्यभिप्रायवेदिना न स्वराष्ट्रे वासो दत्तः।

दुर्योधनः। साधङ्गराज निपुणमभिहितम्।

Digitized by Google

कर्णः। न चायं ममैकस्याभिप्रायः। अन्ये ऽभियुक्ता अपि नैवेदमन्यथा मन्यन्ते।

दुर्योधनः। एवमेतत्। कः संदेहः।

दत्त्वाभयं सो ऽतिरथो वध्यमानं किरीटिना।
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥ ८१ ॥

कृपः। विलोक्य। वत्स। एष दुर्योधनः सूतपुत्रेण सहास्यां न्यग्रोधच्छायायामुपविष्टस्तिष्ठति। तदुपसर्पावः। तथा कृत्वा।

उभौ। विजयतां कौरवेश्वरः।

दुर्योधनः। दृष्ट्वा। अये कथं कृपो ऽश्वत्थामा च। आसनादवतीर्य। गुरो ऽभिवादये। अश्वत्थामानं प्रति। आचार्यपुत्र।

एह्यस्मदर्थकृततात परिष्वजस्व
कान्तेरिदं मम निरन्तरमङ्गमङ्गैः।
स्पर्शस्तवैष भुजयोः सदृशः पितुस्ते
शोके ऽपि नो विकृतिमेति तनूरुहेषु ॥ ८२ ॥

आलिङ्ग्य पार्श्व उपवेशयति। अश्वत्थामा बाष्पमुत्सृजति।

कर्णः। द्रौणायने। अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम्।

दुर्योधनः। आचार्यपुत्र को विशेष आवयोरस्मिन्व्यसनार्णवे। पश्य।

तातस्तव प्रणयवान्स पितुः सखा मे
शस्त्रे यथा तव गुरुः स तथा ममापि।
किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद्गुरुशुचा मनसा त्वमेव ॥ ८३ ॥

कृपः। वत्स यथाह कुरुपतिस्तथैव तत्।

कर्णः। किमत्र विचारेण।

Digitized by Google

अश्वत्थामा। राजन्नेवं पक्षपातिनि त्वयि युक्तमेव शोकभारं लघूकर्तुम्। किं तु।

3.30 मयि जीवति यत्तातः केशग्रहणमाप्तवान्।
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम् ॥ ८४ ॥

कर्णः। द्रौणायने किं क्रियते यदा तेनैव सर्वपरिभवत्राणहेतुना शस्त्रमुत्सृजता तादृशीमवस्थामात्मा नीतः।

अश्वत्थामा। अङ्गराज किमाह भवान्। किं क्रियत इति। श्रूयतां यत्क्रियते।

3.31 यो यः शस्त्रं बिभर्ति स्वभुजगुरुबलः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तको ऽहम् ॥ ८५ ॥

अपि च। भो जामदग्न्यशिष्य कर्ण।

3.32 देशः सो ऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः।
तान्येवाङ्कितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः ॥ ८६ ॥

दुर्योधनः। आचार्यपुत्र तस्य तथाविधस्यानन्यसाधारणस्य ते वीरभावस्य किमन्यत्सदृशम्।

कृपः। राजन्सुमहान्खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभारः। तदहमेवं मन्ये। भवता कृतपरिकरो ऽयमुच्छेत्तुं लोकत्रयमपि समर्थः किं पुनर्युधिष्ठिरबलम्। अतो ऽभिषिच्यतां सेनापत्ये।

दुर्योधनः। सुष्ठु युज्यमानमभिहितं युष्माभिः। किं तु प्राक्प्रतिपन्नो

Digitized by Google

ऽयमर्थो ऽङ्गराजस्य।

कृपः। राजन्नसदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम्। अस्यापि च तदेवारिकुलमनुशासनीयम्। अतः किमस्य पीडा न भविष्यति।

अश्वत्थामा। राजन्कौरवेश्वर किमद्यापि युक्तायुक्तविचारणया।

3.33 प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम्।
इयं परिसमाप्यते रणकथाद्य दोःशालिना-
मपैतु नृपकाननातिगुरुरद्य भारो भुवः॥ ८७॥

कर्णः। वक्तुं सुकरमिदमध्यवसितुं दुष्करम्। बकवः कौरवबले ऽस्य कर्मणः शक्ताः।

अश्वत्थामा। अङ्गराज। एवं बकवः कौरवबले शक्ताः। किं तु दुःखोपकृतः शोकावेगवशाद्ब्रवीमि न पुनर्वीरजनाधिक्षेपेण।

कर्णः। मूढ दुःखितस्याश्रुपातः कुपितस्य चायुधद्वितीयस्य संग्रामावतरणमुचितं नैवंविधाः प्रलापाः।

अश्वत्थामा। सक्रोधम्। अरे रे राधागर्भभारभूत सूतापसद। किमेवमाक्षिपसि।

कर्णः।

3.34 सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मदायत्तं हि पौरुषम्॥ ८८॥

अश्वत्थामा। किमाह भवान्। ममापि नामाश्वत्थाम्नो दुःखितस्याश्रुभिः प्रतिक्रियामुपदिशसि न शस्त्रेण। पश्य।

3.35 निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं

Digitized by Google

संप्रत्येव भयाद्विहाय समरं प्राप्तो ऽस्मि किं त्वं यथा।
ज्ञातो ऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण किम् ॥ ८९ ॥

कर्णः। सक्रोधम्। अरे रे वाचाट वृथाशस्त्रग्रहणदुर्विदग्धवटो।

3.36 निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम्।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना ॥ १० ॥

अश्वत्थामा। सक्रोधम्। अरे रथकारकुलकलङ्क राधागर्भभारभूत। आयुधानभिज्ञ। तातमप्यधिक्षिपसि। अथवा।

3.37 स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाजौ प्रतिदिनमियं वेत्ति वसुधा।
परित्यक्तं शस्त्रं कथमिति स सत्यव्रतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो क्व नु तदा ॥ ११ ॥

कर्णः। विहस्य। एवं भीरुरहं त्वं पुनर्विक्रमैकरसः। तव पितरमनुस्मृत्य महान्मे संशयो ज्ञातः। अपि च। अरे मूढ।

3.38 यदि शस्त्रमुज्झितमशस्त्रपाणयो
न निवारयन्ति किमरीनुदायुधान्।
यदनेन मौलिदलने ऽप्युदासितं
सुचिरं स्त्रियेव नृपचक्रसंनिधौ ॥ १२ ॥

अश्वत्थामा। सक्रोधं सकम्पं च। दुरात्मन्राजवल्लभप्रगल्भ सूतापसद। असंबद्धप्रलापिन्।

3.39 कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य।
तव भुजबलदर्पाध्मायमानस्य वामः

Digitized by Google

शिरसि चरण एव न्यस्यते वारयैनम् ॥ १३ ॥

इति तथा कर्तुमुत्तिष्ठति।

कृपदुर्योधनौ। गुरुपुत्र मर्षय मर्षय। इति निवारयतः। अश्वत्थामा चरणाप्रहारं नाटयति।

कर्णः। सक्रोधमुत्थाय खड्गमाकृष्य। अरे दुरात्मन्ब्रह्मबन्धो। आत्मश्लाघ।

ज्ञात्वा काममवध्यो ऽसि चरणं विममृद्धृतम्।
अनेन लूनं खड्गेन पतितं वेत्स्यसि क्षितौ ॥ १४ ॥

अश्वत्थामा। अरे मूढ किं नाम ज्ञात्वा काममवध्यो ऽस्मि। इयं सा ज्ञातिस्त्यक्ता।

अद्य मिथ्याप्रतिज्ञो ऽसौ किरीटी क्रियते ऽधुना।
शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥ १५ ॥

उभावपि खड्गमाकृष्यान्योन्यं प्रहर्तुमुद्यतौ। कृपदुर्योधनौ निवारयतः।

दुर्योधनः। सखे। आचार्यपुत्र शस्त्रग्रहणेनालम्।

कृपः। वत्स सूतपुत्र शस्त्रग्रहणेनालम्।

अश्वत्थामा। मातुल मातुल किं वारयसि। अयमपि तातनिन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव।

कर्णः। राजन्न खल्वस्मं निवारयितव्यः।

उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया।
अत्रासितानां क्रोधान्धैर्भवत्येषा विकत्थना ॥ १६ ॥

अश्वत्थामा। राजन्मुञ्च मुञ्चैनमासादयतु महाप्रस्थानान्तरनिष्पेषसुलभमसूनामवसादनम्। अन्यच्च राजन्। स्नेहेन कार्येण वा त्वमेनं तातापक्षेपकारिणं दुरात्मानं मत्तः परिरक्षितुमिच्छसि तदुभयमपि वृथैव ते। पश्य।

पापप्रियस्तव कथं गुणिनः सहायः
सूतात्मजः शशधरान्वयसंभवस्य।

Digitized by Google

कृत्वा किरीटिनमकं नृप मुञ्च कुर्या
क्रोधादकर्णमपृथात्मजमद्य लोकम् ॥ १७ ॥

प्रहर्तुमिच्छति ।

कर्णः । खड्गमुद्यम्य । अरे वाचाट ब्राह्मणाधम । अयं न भवसि । राजन्मुञ्च मुञ्च न खल्वकं वारयितव्यः । हन्तुमिच्छति । उभौ निवारयतः ।

दुर्योधनः । कर्ण गुरुपुत्र को ऽयमद्य युवयोर्व्यामोहः ।

कृपः । वत्स । अन्यदेव प्रस्तुतमन्यत्रावेग इति को ऽयं व्यामोहः स्वबलव्यसनं चेदमस्मिन्काले राजकुलस्यास्य युष्मत्त एव भवतीति वामः पन्थाः ।

अश्वत्थामा । मातुल न लभ्यते ऽस्य कटुप्रलापिनो रथकारकुलकलङ्कस्य दर्पः सादयितुम् ।

कृपः । वत्स । अकालः खलु स्वबलप्रधानविरोधस्य ।

अश्वत्थामा । मातुल यद्येवम् ।

3.44 अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत्प्रियमपि मयास्त्रं रणमुखे ।
बलानां नाथे ऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राज्ञा प्रियसखममुं वेत्तु समरे ॥ १८ ॥

इति खड्गमुत्सृजति ।

कर्णः । विहस्य । अपरित्यक्तमपि भवादृशैरायुधं ननु चिरपरित्यक्तमेव निष्फलत्वात् ।

3.45 धृतायुधो यावदकं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति ॥ १९ ॥

नेपथ्ये । आः दुरात्मन्द्रौपदीकेशाम्बराकर्षण महापातकिन्धार्तराष्ट्राप-



Digitized by Google

सद्। चिरस्य खलु कालस्य मत्संमुखीनमागतो ऽसि। नुद्रपशो क्वेदानीं गम्यते। अपि च। भो भो राधेयदुर्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः। शृण्वन्तु भवन्तः।

3.46 स्पृष्टा येन शिरोरुहे नृपसुना पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपकृतं राज्ञां गुरूणां पुरः।
यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवा-
न्सो ऽयं मद्भुजपञ्जरे निपतितः संरद्ध्यतां कौरवाः॥१००॥

सर्व आकर्णयन्ति।

अश्वत्थामा। अङ्गराज सेनापते जामदग्न्यशिष्य द्रोणोपकृतासिन्भुजबलपरिरक्षितसकललोक। धृतायुध इति पठित्वा। इदं तदासन्नतरमेव संवृत्तं रक्षैनं सांप्रतं भीमाद्दुःशासनम्।

कर्णः। आः शक्तिरस्ति वृकोदरस्य मयि जीवति युवराजस्य छायामप्याक्रमितुम्। युवराज न भेतव्यं न भेतव्यमयमहमागतो ऽस्मि। इति निष्क्रान्तः।

अश्वत्थामा। राजन्कौरवनाथ। अभीष्मद्रोणं संप्रति कौरवबलमालोडयन्तौ भीमार्जुनौ राधेयेनैवंविधेनान्येन वा न शक्येते निवारयितुम्। अतः स्वयमेव भ्रातुः प्रतीकारपरो भव।

दुर्योधनः। आः शक्तिरस्ति दुरात्मनः पवनतनयस्यान्यस्य वा मयि जीवति शस्त्रपाणौ वत्सस्य छायामप्याक्रमितुम्। वत्स न भेतव्यं न भेतव्यम्। कः को ऽत्र भोः। रथमुपनय। इति निष्क्रान्तः।

नेपथ्ये कलकलः।

अश्वत्थामा। सभयं विलोक्य। मातुल किमधिकृष्टम्। एष खलु भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं दुर्योधनराधेयौ शरवर्षैर्दुर्वारैरभिद्रवति।

Digitized by Google

हा कष्टं हा कष्टं सर्वथा पीतं दुःशासनशोणितं भीमेन। न खलु विषेहे दुर्योधनानुजस्यैनां विपत्तिमवलोकयितुम्। अनृतमनुमतं नाम। मातुल। शस्त्रं शस्त्रम्।

3.47 सत्यादप्यनृतं श्रेयो धिक्स्वर्गं नरको ऽस्तु मे।
भीमाद्दुःशासनं त्रातुं त्यक्तमत्यक्तमायुधम् ॥ १०१ ॥

इति खड्गं ग्रहीतुमिच्छति।

नेपथ्ये। महात्मन्भारद्वाजसूनो न खलु सत्यवचनमनुल्लङ्घितपूर्वमुल्लङ्घयितुमर्हसि।

कृपः। वत्स। अशरीरिणी वाणी भवत्तमनृताद्भिरक्षति।

अश्वत्थामा। कथमियममानुषी वाग्नानुमनुते संग्रामावतरणम्। भोः कष्टम्। आः पक्षपातिनो देवा अपि पाण्डवानाम्। सर्वथा पीतं दुःशासनशोणितं भीमेन। भोः कष्टम्।

3.48 दुःशासनस्य रुधिरे पीयमाने ऽप्युदासितम्।
दुर्योधनस्य कर्तास्मि किमन्यत्प्रियमाहवे ॥ १०२ ॥

मातुल राधेयक्रोधवशादनार्यमस्माभिराचरितम्। ततस्त्वमपि तावदस्य राज्ञः पार्श्ववर्ती भव।

कृपः। गच्छाम्यहमत्र प्रतिविधातुं भवानपि शिविरसंनिवेशमेव प्रतिष्ठताम्।

परिक्रम्य निष्क्रान्तौ।

॥ इति तृतीयो ऽङ्कः ॥

Digitized by Google

ततः प्रविशति प्रहारमूर्छितं रथस्थं दुर्योधनमपहरन्सूतः।

सूतः ससंभ्रमं परिक्रामति।

नेपथ्ये। भो बाहुबलावलेपप्रवर्तितमकृतसमरदोहदाः कौरवपक्षपातपणीकृतप्राणद्रविणसंचया नरपतयः संस्तभ्यतां संस्तभ्यतां कृतदुःशासनपीतावशेषशोणितस्नपितबीभत्सवेषवृकोदरदर्शनविषादपरिस्खलत्प्रकरणानि रणाद्रवन्ति बलानि।

सूतः। विलोक्य। कथमेष धवलचपलचामरचुम्बितकनककमण्डलुना शिखरावबद्धवैजयन्तीसूचितेन कृतगजवाजिनरकलेवरसकृत्समंदविषमोद्धातकृतकलकलकिङ्किणीजालमालिना रथेन शरवर्षस्तम्भितपरबलपराक्रमप्रसरः प्रद्रुतमात्मबलमाश्वासयन्कृपः किरीटिनाभियुक्तमङ्गराजमनुसरति। कृत्त ज्ञातमस्माद्बलानामवलम्बनम्।

नेपथ्ये कलकलानन्तरं

भीमसेनः। भो भो अस्मद्दर्शनभयस्खलितकार्मुककृपाणतोमरशक्तयः कौरवचमूभटाः पाण्डवपक्षपातिनश्च योधाः। न भेतव्यं न भेतव्यम्। अयमकं निकृतदुःशासनपीवरोरःस्थलक्षतजासवपानमदोद्धतो रभसगामी स्तोकावशिष्टप्रतिज्ञामकृत्सवः कौरवराजस्य द्यूतनिर्जितो दासः पार्थमध्यमो भीमसेनः सर्वान्भवतः साक्षीकरोमि। श्रूयताम्।

Digitized by Google

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याग्रतः
प्रत्यक्षं कुरुबान्धवस्य च तथा कर्णस्य शल्यस्य च।
पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजनुष्पादसृग्वक्षसः ॥१०३॥

सूतः। श्रुत्वा सभयम्। अये आसन्न एष दुरात्मा कौरवराजपुत्रमहावनोत्पातमारुतो मारुतिः। अनुपलब्धसंज्ञश्च तावदत्र महाराजः। भवतु सुदूरमपक्रामामि स्यन्दनम्। कदाचिद्दुःशासन इवास्मिन्नप्यनार्यो ऽनार्यमाचरिष्यति। त्वरिततरं परिक्रम्यावलोक्य च। अये अयमसौ सरसीसरोजविलोलनसुरभिशीतलमातरिश्वसंवाहितसान्द्रकिसलयो न्यग्रोधपादपः। उचिता विश्रामभूरियं समरव्यापारखिन्नस्य वीरजनस्य। अत्रस्थो ऽयं मयोपवीजिततालवृन्तेन कृतचन्दनच्छटाशीतलेनाप्रयत्नसुरभिना दशापरिणामयोग्येन सरसीसमीरणेन च विगतक्लमो भविष्यति महाराजः। लूनकेतुश्चायं रथो ऽनिवारित एव प्रवेक्ष्यति छायाम्। इति प्रवेशं रूपयित्वा। कः को ऽत्र। समन्तादवलोक्य। कथं न कश्चिदत्र परिजनः। नूनं तथाभूतस्य वृकोदरस्य दर्शनादेवंविधस्य च स्वामिनस्त्रासेन शिबिरसंनिवेशमेव प्रविष्टः। कष्टं भोः कष्टं भोः।

द्रोणेनाकृष्य पार्थाद्यमपि च न संरक्षितः सिन्धुराजः
क्रूरं दुःशासने ऽस्मिन्करिण इव कृतं भीमसेनेन कर्म।
दुःसाध्यामप्यरीणां लघुमिव समरे पूरयित्वा प्रतिज्ञां
नाहं मन्ये सकामं कुरुकुलविमुखं दैवमेतावतापि ॥१०४॥

राजानमवलोक्य। कथमद्यापि न चेतनामुपलभते महाराजः। भोः कष्टम्। निर्वर्ण्य।

मदकलितकरेणुभज्यमाने

विपिन इव प्रकटैकशालशेषे।
कृतसकलकुमारके कुले ऽस्मिं-
स्त्वमसि विधेरवलोकितः कठान्तैः ॥१०५॥

ननु भो कृतविधे भरतकुलविमुख।

अज्ञतस्य गदापाणेरनाढ्यस्य संशयम्।
एषापि भीमसेनस्य प्रतिज्ञा पूर्यते त्वया ॥१०६॥

दुर्योधनः। सधीरमुपलब्धसंज्ञः। आः शक्तिरस्ति दुरात्मनो वृकोदरकृतकस्य मयि जीवति दुर्योधने प्रतिज्ञां पूरयितुम्। वत्स दुःशासन न भेतव्यं न भेतव्यम्। अयमकृमागतो ऽस्मि। सूत प्रापय रथं तमुद्देशं यत्र वत्सं द्रक्ष्यामि।

सूतः। आयुष्मन्नलमाः संप्रति वाहास्ते रथमुद्वोढुम्। सपक्षायं। मनो-रथं च।

दुर्योधनः। रथादवतीर्य सगर्वं साकूतं च। किं स्यन्दनगमनकालातिपातेन।

सूतः। सवैलक्ष्यं सकरुणम्। मर्षयत्वायुष्मान्।

दुर्योधनः। धिक्सूत किं रथेन। केवलमरातिविमर्दसंघट्टसंचारी दुर्यो-धनः खल्वकृम्। तद्गदामात्रसहायः समरभुवमवतरामि।

सूतः। आयुष्मन्नेवमेतत्कः संदेहः।

दुर्योधनः। यद्येवं किमेवं भाषसे। पश्य।

बालस्य मे प्रकृतिदुर्ललितस्य पापः
पापं व्यवस्यति समक्षमुदायुधो ऽसौ।
अस्मिन्निवार्यसि किं व्यवसायिनं मां
क्रोधो न नाम करुणा न च ते ऽस्ति लज्जा ॥१०७॥

सूतः। सकरुणं पादयोर्निपत्य। एतद्विज्ञापयामि। आयुष्मन्संपूर्णप्रतिज्ञेन भवि-

तव्यं वृकोदरकृतकेन। यत एवं ब्रवीमि।

दुर्योधनः। सहसा भूमौ पतन्। क्वा वत्स दुःशासन क्वा महाज्ञाविरोधितपाण्डव क्वा विक्रमैकरस क्वा महङ्कदुर्ललित क्वा अरातिकुलगजघटामृगेन्द्र क्वा युवराज। क्वासि। देहि मे प्रतिवचनम्। इति निष्प्रत्य मोहमुपगतः।

सूतः। राजन्समाश्वसिहि समाश्वसिहि।

दुर्योधनः। संज्ञां लब्ध्वा निष्प्रत्य।

मुक्तो यथेष्टमुपभोगसुखेषु नैव
त्वं लालितो ऽपि हि मया न वृथाग्रजेन।
अस्यास्तु वत्स तव हेतुरकं विपत्ते-
र्यत्कारितो ऽस्यविनयं न च रक्षितो ऽसि ॥१०८॥

इति पतति।

सूतः। आयुष्मन्समाश्वसिहि समाश्वसिहि।

दुर्योधनः। धिक्सूत किमनुष्ठितं भवता।

रक्षणीयेन सततं बालेनाज्ञानुवर्तिना।
दुःशासनेन भ्रात्राकमुपकारेण रक्षितः ॥१०९॥

सूतः। महाराज मर्मभेदिभिरिषुतोमरशक्तिप्रासवर्षैर्महारथानामपकृतचेतनत्वान्निश्चेतनः कृतो महाराज इत्यपकृतो मया रथः।

दुर्योधनः। सूत विद्रूपं कृतवानसि।

तस्यैव पाण्डवपशोरनुजद्विषो मे
दोर्दण्डदाशनिकृतैर्न विबोधितो ऽस्मि।
अद्यैव नाधिशयितो रुधिरार्द्रशय्यां
दौःशासनीं यदकमाशु वृकोदरो वा ॥११०॥

Digitized by Google

निःश्वस्य नभो विलोक्य। ननु भो कृतविधे कृपाविरहित भरतकुलविमुख।
अपि नाम भवेन्मृत्युर्न च कृत्ता वृकोदरः।
सूतः। शान्तं पापं शान्तं पापं महाराज किमिदम्।
दुर्योधनः।
घातिताशेषबन्धोर्मे किं राज्येन जयेन वा ॥१११॥

ततः प्रविशति सप्रहारः

पुरुषः। अज्जा अबि णाम इमस्सिं उद्देसे सारक्खिदुदीओ दिट्ठो तुम्हेहिं महाराअदुज्जोहणो ण वेत्ति। कहं ण को बि मत्तेदि। होदु एदाणं बद्धपरिआराणं पुरिसाणं समूहो दीसइ त्ति एत्थ गदुअ पुच्छिस्सं। विलोक्य। कहं एदे सस्सामिणो गाढप्पहाराहदस्स घणसंणाहजालदुब्भेज्जमुहेहिं कङ्कबत्तेहिं किअआदो सल्लाइं उद्धरन्ति ता खु एदे ण जाणन्ति। होदु अप्पादो विचिणाइस्सं। इमे क्खु अबरे पहदद्दरा संकलिदा वीरमाणुसा। एत्थ गदुअ पुच्छिस्सं। उपगम्य। हंहो जाणह कस्सिं उद्देसे कुरुणाहो वट्टइ त्ति। कहं एदे बि मं देक्खिअ अक्खिअदरं रोअन्ति। दृष्ट्वा। ता ण क्खु एदे बि जाणन्ति। हा दुक्करं क्खु एत्थ वट्टइ। एसा वीरमादा समलविणिहदं पुत्तअं सुणिअ रत्तंसुअणिवसणाए वहूए सह अणुमरदि। सघ्राघम्। साहु वीरमादे साहु अप्पस्सिं बि जम्मन्तरे अणिहदपुत्तआ हुविस्ससि। होदु अप्पादो विचिणाइस्सं। अन्यतो विलोक्य। अअं अबरो बहुप्पहरणिहदकाओ अकिदव्वणप्पडीआरो एव्व जोहसमूहो चिट्ठइ। इमं सुप्पासणं तुलंगमं उबालक्खिअ रोइदि। णूणं एदाणं एत्थ एव्व सामी वाबादिदो त्ति। ता ण क्खु एदे बि जाणन्ति। होदु अप्पादो गदुअ पुच्छिस्सं। सर्वतो विलोक्य। कहं सव्वो एव्व अवत्थाणुरूवं विसणं अणुहवन्तो भाअधेअविमुहदाए पञ्चाउलो जणो ता कं

Digitized by Google

एत्थ पुच्छिस्सं कं वा उबालहिस्सं। भोदु सव्वं एव्व एत्थ विआणिस्सं। परिक्रम्य। देव्वं एव्व दाणिं उबालहिस्सं। हंहो देव्व एआदसाणं अक्खोहिणीणं णाहो जेट्ठो भादुसअस्स भत्ता गङ्गेयद्दोणअङ्गराअसल्लकिबकिदव्वम्मअस्सत्थामप्पमुहस्स राअचक्कस्स सअलपङ्कवीमाउलेक्कणाहो महाराअदुज्जोहणो वि अक्खेसीअदि ण जाणे कस्सिं उद्देसे सो वट्टइ त्ति। विचिन्त्य निर्गुत्य च। अहवा किं एत्थ देव्वं उबालहामि। तस्स क्खु एअं णिव्भच्छिअविउरवअणवीअस्स परिभूदपिदामहहिदोबदेसङ्कुरस्स सउणिहदअप्पोच्छाहणादिविद्दुमूलस्स जदुगेहज्जूदविससाहिणो संभूदचिरआलसंबद्धवेरालवालस्स पञ्चालिआकेसग्गहणकुसुमस्स फलं परिणमदि। अन्यतो विलोक्य। जहा एत्थ एसो विविहरअणप्पहासंवलिदसूरकिरणप्पसूदसकुचाबसहस्ससंपूरिददसदिहामुहो लूणकेदुवंसो रहो दीसइ। ता अहं तक्केमि अवस्सं एदिणा महाराअदुज्जोहणस्स विस्सामुद्देसेण होदव्वं। उपसृत्य दृष्ट्वा च। जेदु जेदु महाराओ।

सूतः। विलोक्य। आयुष्मन्समरात्सुन्दरकः प्राप्तः।

राज्ञा। विलोक्य। अये सुन्दरक कच्चित्कुशलमङ्गराजस्य।

सुन्दरकः। देव कुसलं सरीरमेत्तेण।

राज्ञा। ससंभ्रमम्। सुन्दरक किं किरीटिनास्य निहता धौरेयकाः। कृतः सारथिः। भग्नो वा रथः।

सुन्दरकः। देव ण रहो भग्गो से मणोरहो वि।

राज्ञा। किमेवमविस्पष्टकथितैराकुलमपि मे मनः पर्याकुलयसि। तदशेषतो विस्पष्टं कथ्यताम्।

सुन्दरकः। जं देवो आणवेदि त्ति। अए देवस्स मउडमणिप्पहावेण अवणीदा मे रणप्पहारवेअणा। इति साटोपं परिक्रम्य। सुणादु देवो। अत्थि



Digitized by Google

दाणिं कुमालदुस्सासणावध। इत्यर्धोक्ते मुखमावृणोति।

सूतः। सुन्दरक कथय कथितमेव दैवेन।

राज्ञा। कथ्यतां श्रुतमस्माभिः।

सुन्दरकः। सुणाडु देवो। अज्ज दाव दुस्सासणावक्कामरिसिदेण सामिणा अङ्गराएण कुडिलभिउडीभङ्गभीसणाललाडबद्धेण अविस्सादसंधाणमोक्खेण सिलीमुहसंघादवरिसिणा अभिजुत्तो सो दुराआरो मक्कमपणडवो भीमसेणकुद्धो।

उभौ। ततस्ततः।

सुन्दरकः। तदो देव उक्कअबलमिलन्तदिप्पन्तकरितुरअपदादिसमुद्धूतधूलिणिवहेण पल्लत्थतत्तग्गअघटासंघादेण अ वित्थरन्तेण अन्धआरेण अन्धीकदं उक्कअबलं ण भुवणातलं लक्खीअदि।

उभौ। ततस्ततः।

सुन्दरकः। तदो देव दूराअड्ढिअधणुग्गुणच्छोडणटंकारगम्भीरभीसणेण अन्धआरेण जाणीअदि गज्जिदं पलअजलहरेणेत्ति।

दुर्योधनः। ततस्ततः।

सुन्दरकः। तदो अ दोण्हिणं ताणं अस्सोअसिंहणादगज्जिदपिसुणं विविहपरिमुक्कप्पहरणाहदकवअसंजलिदज्जलणविज्जुअं बहलसुद्धिलविन्दुखज्जोअभासुरं गभीरत्थणिअचापजलहरप्पसरिदसरधारासहस्सवरिसदुद्दंसणं संभूतं समरदुद्दिणं।

दुर्योधनः। ततस्ततः।

सुन्दरकः। तदो अ देव एदस्सिं अन्तरे जेट्ठस्स भादुणो पराभवसङ्किणा धणंजयेण वज्जणिग्घादणिग्घोसविसमरसिदरुसिहरिद्दवाणरो तुरंगमसंवाहणवाउलवासुदेवसङ्खचक्कगदासिलच्छिअचटुलचडब्बाहु-

Digitized by Google

दण्डउद्दंसणो आपूरिदपच्चन्तणादेवदत्ततारसिअप्पडिरवभरिददसदिसामुक्कुक्कुरो धाविदो तं उद्देसं रहवरो।

दुर्योधनः। ततस्ततः।

सुन्दरकः। तदो भीमसेणधणंजयेहिं अभिन्तुत्तं पिदरं पेक्खिअ ससंभमविअलिअं अवधूणिअ रअणसीसअं आअक्खाअढिदकठिणकोअण्डणीओ दाहिणहत्थक्खित्तसरपुङ्खबन्धणो विधट्टणतुराबिदसारहीओ तं देसं उवगदो कुमालविससेणो।

दुर्योधनः। साक्षेपम्। ततस्ततः।

सुन्दरकः। तदो अ तेण देव आअच्छन्तेण एव्व कुमालविससेणेण विदलिदासिलदासामलसिणिद्धपुङ्खेहिं कठिणकङ्कबत्तेहिं कसणवअणेहिं सिलाणिसिदसामलसल्लबन्धेहिं कुसुमिदो विअ तन्नू मुक्कत्तणेण सिलीमुहेहिं पच्छादिदो धणंजअस्स रहवरो।

उभौ। सहर्षम्। ततस्ततः।

सुन्दरकः। तदो देव तिक्खविक्खित्तणिसिदभल्लवरिसिणा धणंजयेण ईसि विहसिअ भणिदं। अरे रे विससेण पिउणो बि दाव ण दे मह अभिमुहं ठाडुं जुत्तं अह किं उण भवदो बालस्स। ता गच्छ अबरेहिं कुमारकेहिं आओधेहि त्ति। एव्वं अ णिसमिअ गुरुअणाहिक्खेवेण उद्दीविअकोवोवरत्तमुहमण्डलविअम्भिअभीमभिउडीभङ्गभीसणेण चाबधारिणा कुमालविससेणेण बि मम्मभेदणेहिं परुसविसमेहिं सुदिवहकदप्पणएहिं णिब्भच्छिदो गण्डीवी बाणेहिं ण उण दुरुवअणेहिं।

राजा। साधु वृषसेन साधु साधु। ततस्ततः।

सुन्दरकः। तदो अ देव सिदसराभिघादवेअणोपन्नादमक्खुणा गण्डीविणा चण्डगण्डीअन्नीआसद्दणिज्जिदवज्जाणिग्घादघोसेण बाणणिपड-

णप्पडिसिद्धदंसणप्पसरेण पत्थुदं सिक्खाबलाणुरूवं किं बि अग्गलिअं।

दुर्योधनः। साकूतम्। ततस्ततः।

सुन्दरकः। तदो अ देव तं च पेक्खिअ तस्स सत्तुणो समरवावारचउरत्तणं अविभाविदतूणीमुक्कधणुग्गुणगमणासरसंधाणमोक्खचटुलकरअलेण कुमालविससेणेण बि सविसेसं पत्थुदं समलकम्मं।

दुर्योधनः। ततस्ततः।

सुन्दरकः। तदो अ देव परिसेसिदरणवावारो विमुक्कचिरणिघडिअवेराणुबन्धो दोण्णं बि कुरुराअपण्डवबलेसु साङ्कविससेण साङ्कत्ति कलकलमुक्करो वीरलोओ आलोइडं पउत्तो।

दुर्योधनः। सविस्मयम्। ततस्ततः।

सुन्दरकः। तदो अ देव अवरुद्धोरिअसअलधाणुक्कचक्कपरक्कमसालिणो सुदस्स तधाविहेण समलकम्मारम्भेण हरिसरोसकरुणासङ्कासंकडे अणुवरूमाणस्स सामिणो अङ्कराअस्स णिपडिदा सरपङ्कई भीमसेणे बप्फआउला दिट्ठी कुमालविससेणे।

दुर्योधनः। सविस्मयम्। ततस्ततः।

सुन्दरकः। तदो अ देव उक्कअबलप्पउत्तसाङ्कारामरिसिदेण सरवरिसप्पज्जलिदेण गण्डीविणा तुरएसु सारहिं पि रक्खवरे धणुं पि ज्जीआइं पि णलिन्दलच्छणे सिदादबत्ते वाबारिदा समं सिलीमुहा।

दुर्योधनः। सभयम्। ततस्ततः।

सुन्दरकः। तदो देव विरक्खो लूणगुणकोदण्डओ परिब्भमणमित्तवावारप्पडिसिद्धसरसंपादो मण्डलाइं विरइडं पउत्तो कुमालो।

दुर्योधनः। साग्रहम्। ततस्ततः।

सुन्दरकः। तदो अ देव सुदरक्खविद्धंसणामरिसुद्दीविएण सामिणा

Digitized by Google

अङ्गराएण अगणिअभीमसेणाभिन्नोएण पत्थुदो धणंजअस्स उवरि सिलीमुहासारओ। कुमालविससेणो वि परिअणोवणीदं अण्णं रहं आरुहिअ पुणो वि संवुत्तो धणंजआभिओए। भणिदं च कुमालेण। रे रे तादाहिक्खेवमुहर मज्झमपण्डव। मह सरा तुह सरीरं उड्डिअ अण्णस्सिं ण णिवडन्ति त्ति भणिअ सरसहस्सेहिं पण्डवसरीरं पच्छाइअ सिंहणादेण गज्जिदुं पउत्तो।

दुर्योधनः। सविस्मयम्। अहो बालस्य पराक्रमो मुग्धस्वभावेऽपि। ततस्ततः।

सुन्दरकः। तदो अ देव तस्स सरसहस्ससंपादं अवधुणिअ किरीटिणा गहिदा रुच्छङ्गादो कणन्तकणअकिङ्किणीजालकंकारविराइणी मेहोवरोहविमुक्कणहत्थलणिम्मला णिसिदसामलसिणिद्धमुट्ठी विविहरअणप्पहाभासुरभीसणरमणीअदंसणा सत्ती सोवहासं विमुक्का धणंजएण कुमालाभिमुहं।

दुर्योधनः। सविषादम्। अहह। ततस्ततः।

सुन्दरकः। तदो अ देव पज्जलन्तिं सत्तिं पेक्खिअ विअलिअं अङ्गराअस्स हत्थादो ससरं धणुं हिअआदो वीरसुलहो उच्छाहो णिअणादो बप्फसलिलं वअणादो रसिदं हसिदं अ धणंजएण सिंहणादं विणादिदं विओदलेण अ दुक्कलं दुक्कलं त्ति अक्कन्दिदं कुरुबलेण।

दुर्योधनः। सविषादम्। ततस्ततः।

सुन्दरकः। तदो अ देव कुमालविससेणेण आअण्णाकरिसिदणिसिदखुरप्पेण सुचिरं णिब्भच्छिअ अद्धपहे एव्व भाइरहीं विअ भअवदा विसमलोअणेण तिधा किदा सत्ती।

दुर्योधनः। साधु वृषसेन साधु। ततस्ततः।

Digitized by Google

सुन्दरकः। तदो एदस्सिं अन्तरे किद्कलकलमुक्करेण वीरलोअसाधुवादेण अन्तरिदो समरतूररवो सिद्धचालणगणविमुक्केण कुसुमप्पकरेण पच्छादिदं समलङ्गणं।

दुर्योधनः। अहो बालस्य पराक्रमः। ततस्ततः।

सुन्दरकः। तदो अ देव भणिदं सामिणा अङ्गराएण भो विअोदल असमत्तो तुह मह बि समलवावारो ता अणुमण्णदु मं मुक्कत्तअं पेक्खाम दाव वच्छस्स तुह भादुणो धणुव्वेदसिक्खाणिउणत्तणं तुह वि एदं पेक्खणीअं त्ति। तदो विरद्दाओ रणवावारणिब्बन्धादो मुक्कत्तअं पसमिदवेरा जादा दुवे वि पेक्खआ भीमसेणङ्गराआ।

दुर्योधनः। साभिप्रायम्। ततस्ततः।

सुन्दरकः। तदो अ देव एदस्सिं अन्तरे सत्तिखएडणामरिसिदेण गएडीविणा एवं भणिदं। रे रे दुज्जोहणप्पमुहा। इत्यर्धोक्ते लज्जां नाटयति।

दुर्योधनः। सुन्दरक कथ्यतां परवचनमेतत्।

सुन्दरकः। सुणादु देवो। अरे दुज्जोहणप्पमुहा कुरुबलसेणापङ्गणआ। रे अविणअणइकम्मधार कम्म। तुम्हेहिं मह परोक्खं एआई पुत्तओ अक्किमण्णू वाबादिदो अहं उण तुम्हाणं पेक्खन्ताणं एदं कुमालविससेणं सुमरिदवेसेसं करोमि त्ति भणिअ सगव्वं अप्फालिदं णेण णिग्घादघोसणिसादजीआरवं गएडीवं सामिणा वि सज्जीकिदं कालपुढं।

दुर्योधनः। सावहित्थम्। ततस्ततः।

सुन्दरकः। तदो अ एदस्सिं अन्तरे पडिसिद्धभीमसेणसमलकम्मारम्भेण गएडीविणा विरइदा अङ्गराअविससेणरक्कूलंकसाओ बाणवरिसओ। तक्किं बि दुवेहिं अण्णोण्णसिणेहदंसिदसिक्खाविसेसेहिं अक्खित्तो मल्लकमपएडओ।

Digitized by Google

दुर्योधनः। ततस्ततः।

सुन्दरकः। तदो अ गएडीविणा तारारसिद्धीआणिग्घोसमेत्तविसा-दबाणवरिसेण तरु आरुहिअं पत्तिकिं ण तरु ण णकुत्थलं ण सामो ण रुक्खो ण धरणी ण कुमालो ण केडुवंसो ण बलाइं ण सारही ण तुलंगमा ण दिसाओ ण वीरलोओ अ संलक्खीअदि।

दुर्योधनः। सविस्मयम्। ततस्ततः।

सुन्दरकः। तदो अ देव खणमेत्तं एव्व अदिक्कन्ते सरसंपादे सरुरिस-सिंकणादे पण्डवसेण्णे विमुक्कक्कन्दे कोरवबले समुत्थिदो महन्तो कल-अलो हा हदो कुमालो विससेणो त्ति।

दुर्योधनः। सबाष्परोषम्। ततस्ततः।

सुन्दरकः। तदो अ देव पेक्खामि कुमालं हदसारहितुलंगं तूणाद-बत्तचापचामरकेडुवंसं सग्गप्पब्भट्ठं विअ सुलकुमालं हिअअमम्मभेदि-णा एक्केण सिलीमुहेण भिण्णदेहं रुहमञ्के पल्लत्थं।

राजा। साक्षम्। अरुरु कुमारवृषसेन। अलमतःपरं श्रुत्वा। हा वत्स वृषसेन हा मद्भुजदुर्ललित हा मदाज्ञाकर हा गदायुद्धप्रियशिष्य हा शौर्यसागर हा राधेयकुलप्ररोह हा प्रियदर्शन हा दुःशासननिर्विशेष हा सर्वगुरुवत्सल। प्रयच्छ मे प्रतिवचनम्।

पर्याप्तनेत्रमचिरोदितचन्द्रकान्त-
मुद्भिद्यमाननवयौवनरम्यशोभम्।
प्राणापचारपरिवर्तितदृष्टि दृष्टं
कर्णेन तत्कथमिवाननपङ्कजं ते ॥११२॥

सूतः। आयुष्मन्नलमत्यन्तशोकावेगेन।

दुर्योधनः। सूत पुण्यवन्तो हि दुःखभाजो भवन्ति। अस्माकं पुनः

प्रत्यक्षं कृतबन्धूनामेतत्परिभवाग्निना।
हृदयं दह्यते ऽत्यर्थं कुतो दुःखं कुतो व्यथा ॥११३॥

इति मोहमुपगतः।

सूनः। समाश्वसितु समाश्वसितु। पटान्तेन वीजयति। आयुष्मन्नलमत्यन्तदुःखावेगेन।

दुर्योधनः। लब्धसंज्ञः। भद्र सुन्दरक वयस्येन किं प्रतिपन्नमङ्गराजेन।

सुन्दरकः। तदो देव तक्कदस्स पुत्तस्स दंसणेण संगलिदं अस्सुजलं उल्लिअ अणवेक्खिदपरप्पकरणेण सामिणा अङ्गराएण अभिन्नुत्तो धणंजओ। तदो तं च सुदक्कामरिसिदं विमुक्कजीविदासं तक्क परिक्कमन्तं पेक्खिअ भीमणउलसक्कदेवपञ्चालप्पमुक्केहिं अत्तरिदो धणंजअस्स रक्खो।

दुर्योधनः। ततस्ततः।

सुन्दरकः। तदो अज्जुणचाबमक्कप्पलअपओक्करणिस्सरिअसरधारासक्कसेहिं पूरिदेसु दिसामुक्केसु सल्लेण भणिदो सामी अङ्गराओ। जक्क अङ्गराअ कदतुलंगमो मथिदचक्कणेमिकूबरो दे रक्खो ता ण जुत्तं भीमज्जुणेहिं अक्खिजुज्झिदुं त्ति भणिअ णिवत्तिदो रक्खो ओदारिओ सामी सन्दणादो बक्कप्पआरं अ समस्सासिदो।

राजा। ततस्ततः।

सुन्दरकः। तदो अ सामिणा सुदूरं विलम्बिअ परिअणो अभिक्खिदो अम्हं रक्खं मे उवणेहि त्ति परिजणोवणीदं अम्हं रक्खं पेक्खिअ मए दिट्ठादिट्ठी सुन्दर एहि त्ति भणिदं अ। अक्खं च उवगदो समीवं। तदो अवणीअ सीसट्ठाणादो पट्टिअं सरीरसंगलिदेहिं सोणिअबिन्दूहिं दिट्ठवअणं बाणं कड्ढिअ अभिलिक्खिदो एसो देवस्स सदेसो। इति पट्टिकामर्पयति।

Digitized by Google

राज्ञा। गृहीत्वा वाचयति। यथा स्वस्ति महाराजदुर्योधन। समराङ्गणात्कर्ण एतद्दत्तं कण्ठे गाढमालिङ्ग्य विज्ञापयति।

अस्त्रग्रामविधौ कृती न समरेष्वस्यास्ति तुल्यः पुमा-
न्भ्रातृभ्यो ऽपि ममाधिको ऽयमुना ज्ञेयाः पृथासूनवः।
त्वत्संभावित इत्यहं न च कृतो दुःशासनार्ऋषया
त्वं दुःखप्रतिकारमेहि भुजयोर्वीर्येण बाष्पेण वा ॥ ११४ ॥

दुर्योधनः। वयस्य कर्ण कर्ण। किमिदं कृतभ्रातृशतं मामपरेण वाक्शल्येन घट्टयसि। भद्र सुन्दरक। अथेदानीं किमारम्भो ऽङ्गराजः।

सुन्दरकः। देव अबणीदसरीरावरणो अप्पवहकिदणिच्चओ सअं एव्व समलं मग्गदि।

दुर्योधनः। श्रुत्वा सत्वरमुत्तिष्ठन्। सुन्दरक त्वमपि मद्वचनात्त्वरिततरं गत्वा वयस्यमङ्गराजं प्रतिबोधय। न खलु जयाकाङ्क्षी भवानिदानीम्। अभिन्न एवायमावयोः संकल्पः। किं तु

कृत्वा पार्थान्सलिलमशिवं बन्धुवर्गाय दत्त्वा
मुक्त्वा बाष्पं सकृ कतिपयैर्मन्त्रिभिश्चारिभिश्च।
कृत्वान्योन्यं सुचिरमपुनर्भावि गाढोपगूढं
संत्यक्ष्यावो हृततनुमिमां दुःखितौ निर्वृतौ वा ॥ ११५ ॥

अथवा कर्ण प्रति मया किंचित्संदेष्टव्यम्।

वृषसेनो न ते पुत्रो न मे दुःशासनो ऽनुजः।
त्वां बोधयामि किमहं त्वं मां संस्थापयिष्यसि ॥ ११६ ॥

सुन्दरकः। जं देवो आणवेदि। इति निष्क्रान्तः।

राज्ञा। अये नेमिधनिरिव।

सूतः। एष सख्य एव संवर्धितो नेमिधनिः।



Digitized by Google

दुर्योधनः। नूनं परिजनोपनीतो रथः। गच्छ त्वं सज्जीकुरु।

सूतः। यदाज्ञापयति। इति निष्क्रम्य पुनः प्रविशति।

दुर्योधनः। विलोक्य। किमिति नारूढो ऽसि।

सूतः। एष खलु तातो ऽम्बा च संजयेनाधिरूढं रथमारूढौ देवसकाशमनुप्राप्तौ।

दुर्योधनः। कष्टमतिबीभत्समाचरितं दैवेन। सूत गच्छ त्वं स्यन्दनं तूर्णमुपकुरु। अहमपि तातदर्शनं परिकरन्नेकान्ते तिष्ठामि।

सूतः। देव त्वदेकशेषबान्धवावेतौ कथमिव न समाश्वासयसि।

राज्ञा। सूत कथमिव समाश्वासयामि विमुखभागधेयः। पश्य।

अग्रेवावां रणमुपगतौ तातमम्बां च दृष्ट्वा
घातस्ताभ्यां शिरसि विनतो ऽहं च दुःशासनश्च।
तस्मिन्बाले प्रसभमरिणा प्राणिते तामवस्थां
पार्श्वे पित्रोरहमुपगतः किं नु वक्ष्यामि ताभ्याम् ॥११७॥

तथाप्यवश्यं वन्दनीयौ गुरू।

इति निष्क्रान्तौ।

॥ इति चतुर्थो ऽङ्कः ॥

Digitized by Google

ततः प्रविशन्ति रथयानेन गान्धारी संजयो धृतराष्ट्रश्च।

धृतराष्ट्रः। वत्स संजय। कुरुकुलकाननैकशेषप्रबालो मे वत्सो दुर्योधनः कच्चिज्जीवति वा न वा।

गान्धारी। जाद जुज्जदि सच्चं जीवदि सो ता कस्सिं कज्जे तं उद्देसं।

संजयः। नन्वेष महाराज एक एव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति।

गान्धारी। जाद एआइ त्ति भणासि किं णु क्खु संपदं तस्स भादुअसदं पासे ण भविस्सदि।

संजयः। तात। अम्ब। अवतरतं स्वैरं रथात्। उभाववतरणं नाटयतः।

ततः प्रविशति सव्रीडोपविष्टो दुर्योधनः।

संजयः। उपसृत्य। विजयतां महाराजः। नन्वेष तातो ऽम्बया सह प्राप्तः। किं न पश्यति महाराजः।

दुर्योधनो वैलक्ष्यं नाटयति।

धृतराष्ट्रः।

5.1. शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे
बद्धेषु व्रणपट्टकेषु शनकैः कर्णो कृतापाश्रयः।
दूरान्निर्जितसात्वितान्नरपतीनालोकयँल्लीलया
सख्या पुत्रक वेदनेति न मया पापेन पृष्टो भवान्॥११८॥

Digitized by Google

धृतराष्ट्रो गान्धारी च स्पर्शेनोपेत्यालिङ्गतः।

गान्धारी। वच्छ। अदिगाढ्यकारवेअणापज्जाउलस्स अम्हेसु बिण दे पसरदि वाणी।

धृतराष्ट्रः। वत्स दुर्योधन। किमकृतपूर्वः संप्रति मय्यप्ययमव्याहारः।

गान्धारी। वच्छ। ज्ञइ तुमं बि अम्हे णालबसि किं दाणिं दुस्सासणो आलबिस्सदि दुम्मरिसणो वा अण्णो वा। इति रोदिति।

दुर्योधनः।

पापो ऽहमप्रतिकृतानुजनाशदर्शी
तातस्य बाष्पपयसां तव चाम्ब हेतुः।
दुर्जातमत्र विमले भरतान्वये ऽपि
किं मां सुतक्षयकरं सुत इत्यवैषि ॥११९॥

गान्धारी। जाद अलं परिदेविदेण। तुमं बि दाव एक्को अन्धजुअलस्स मग्गोबदेसको चिरं जीव। किं मे रज्जेण वेरेण वा।

दुर्योधनः।

मातः किमप्यसदृशं विकृतं वचस्ते
सुहृत्त्रिया क्व भवती क्व च दीनतैषा।
निर्वत्सले सुतशतस्य विपत्तिमेतां
त्वं नानुचिन्तयसि रक्षसि मामयोग्यम् ॥१२०॥

नूनं विचेष्टितमिदं सुतशोकस्य।

संजयः। महाराज किं वायं लोकवादो वितथः। न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेप्तव्येति।

दुर्योधनः। अपुष्कलमिदम्। उपक्रियमाणाभावे किमुपकरणेन। इति रोदिति।

Digitized by Google

धृतराष्ट्रः। दुर्योधनं परिष्वज्य। वत्स समाश्वसिहि समाश्वासय चास्मानिमामपि दीनां स्वमातरम्।

दुर्योधनः। तात दुर्लभः समाश्वास इदानीं युष्माकम्। किं तु।

कुन्त्या सह युवामद्य मया निकृतपुत्रया।
विराजमानौ शोके ऽपि तनयाननुशोचतम्॥ १२१॥

गान्धारी। जाद एदं एव्व दाणिं पभूतं जं तुमं बि दाव एक्को जीवसि कं अण्णं अणुसोचिस्सं। ता जाद अकालो दे समरस्स पसीद एसो दे अञ्जली णिवत्तीअदु समरव्वाबारादो। अपच्छिमं करेहि वअणं।

धृतराष्ट्रः। वत्स शृणु वचनं तवाम्बाया ममापि निकृताशेषबन्धुवर्गस्य। पश्य।

दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात्।
वत्सानां निधनेन मे वयि रिपुः शेषप्रतिज्ञो ऽधुना
क्रोधं वैरिषु मुञ्च वत्स पितरावन्धाविमौ पालय॥ १२२॥

दुर्योधनः। समरात्प्रतिनिवृत्य किं करिष्यामि।

गान्धारी। जं पिदा दे विदुरो वा भणिस्सदि तं अणुचिट्ठ।

संजयः। एवमिदम्।

दुर्योधनः। संजय। अद्याप्युपदेष्टव्यमस्ति।

संजयः। देव यावत्प्राणनाशस्तावदुपदेष्टव्या नृपतयो विजिगीषवः प्रज्ञावताम्।

दुर्योधनः। शृणुमस्तावद्भवत एव प्रज्ञावतो ऽस्मत्प्रतिरूपमुपदेशम्।

धृतराष्ट्रः। वत्स युक्तवादिनि संजये किमत्र क्रोधेन। यदि प्रकृतिमापद्यसे तदहमेव तावद्भवन्तं ब्रवीमि।

Digitized by Google

दुर्योधनः। कथयतु तातः।

धृतराष्ट्रः। किं विस्तरेण। संधत्तां भवानिदानीं युधिष्ठिरस्य समीप्सितेन पणेन।

दुर्योधनः। तात तनयस्नेहाद्म्बा बालिशत्वात्संजयश्च काममेवं ब्रवीतु युष्माकमप्येवं व्यामोहः। अथवा। इति प्रभवति पुत्रनाशशोकजन्मा हृदयज्वरः। तथा चास्खलितभ्रातृशतस्तथावधीरितवासुदेवसामोपन्यासः संप्रति दृष्टपितामहाचार्यानुजराजचक्रविपत्तिः शरीरमात्रकस्नेहादुदात्तपुरुषव्रीडावहमसुखावसानं च कथमिव करिष्यति दुर्योधनः सहृ पाण्डवैः संधिम्। अन्यच्च नयवेदिन्संजय।

हीनमानान्किल रिपून्नृपाः संदधते कथम्।
दुःशासनेन हीनो ऽहं सानुजः पाण्डवो ऽधुना॥१२३॥

धृतराष्ट्रः। वत्स। एवं गतेऽ पि मम प्रार्थनया न किंचिन्न करोति युधिष्ठिरः। अन्यच्च। सर्वं दैवापकृष्टं मन्यते भवद्भ्यो युधिष्ठिरः।

दुर्योधनः। कथमिव।

धृतराष्ट्रः। श्रूयतां प्रतिज्ञा युधिष्ठिरस्य। नाहमेकस्यापि भ्रातुर्विपत्तौ प्राणान्धारयामीति। बहुच्छलत्वात्संग्रामस्यानुजनाशमाशङ्कमानो यथैव भवते रोचते तथैवासौ सज्जः संधातुम्।

संजयः। एवमिदम्।

गान्धारी। उपपत्तिजुत्तं पडिबज्जस्स पिदुणो वअणं।

दुर्योधनः। तात। अम्ब। संजय।

एकेनापि विनानुजेन मरणं पार्थः प्रतिज्ञातवा-
न्भ्रातॄणां निकृते शते विषकृते दुर्योधनो जीवितुम्।
तं दुःशासनशोणिताशिनमरिं भिन्द्न्गदाकोटिना

Digitized by Google

भीमं दिन्नु न विक्षिपामि कृपणः संधिं विदध्यामकम्॥१२४॥

गान्धारी। हा ज्ञाद दुस्सासण हा दुम्मरिसण हा विअण्ण हा वीरसदप्पसविणी गन्धारी दुक्खसदं पसूदा ण सुदसदं। सर्वे रुदन्ति।

संजयः बाष्पमुत्सृज्य। तात। अम्ब। प्रतिबोधयितुं मकाराजमिमां भूमिं युवामागतौ तदात्मापि तावत्संस्तभ्यताम्।

धृतराष्ट्रः। वत्स। एवं विमुखेषु भागधेयेषु त्वयि चामुञ्चति मानबन्धमरिषु त्वदेकशेषजीवितावलम्बनेयं तपस्विनी गान्धारी किमवलम्बतां शरणमकं च।

दुर्योधनः। श्रूयताम्।

कलितभुवना भुक्तैश्वर्यास्तिरस्कृतविद्विषः
प्रणतशिरसां राज्ञां चूडासकस्रकृतार्चनाः।
अभिमुखमरीन्घ्नन्तः संख्ये कृताः शतमात्मजा
वकृतु सगरेणोढां तातो धुरं सकितो ऽम्बया॥१२५॥

विपर्यये त्वस्याधिपतेरुच्छ्रितः क्षात्रधर्मः।

नेपथ्ये महान्कलकलः।

गान्धारी। आकर्ण्य सभयम्। संजअ हाहाकारमिस्सं तूररसिदं सुणीअदि।

संजयः। अ मिरियमेवंविधानां भीरुजनानाम्।

धृतराष्ट्रः। वत्स संजय ज्ञायतामतिभैरवः खलु विस्तारी हाहारवः। कारणेनास्य मकता भवितव्यम्।

दुर्योधनः। तात प्रसीद। पराङ्मुखं खलु दैवमस्माकं यावदपरमपि किंचिदत्याकितं न श्रावयति तावदेवाज्ञापय संग्रामं प्रति माम्।

गान्धारी। ज्ञाद मुञ्चत्तअं दाव मन्दभाइणिं समस्सासेहि।

धृतराष्ट्रः। वत्स यद्यपि भवान्समराय कृतनिश्चयस्तथापि रकःप्रति-

Digitized by Google

घातोपायश्चिन्त्यताम्।

दुर्योधनः।

प्रत्यक्षं कृतबान्धवा मम परे कर्तुं न योग्या रहः
किं वा तेन कृतेन तैरिव कृतं यन्न प्रकाश्यं रणे।

गान्धारी। ता जाद एआई तुमं को दे सक्काअत्तणं करिस्सदि।

दुर्योधनः।

एको ऽहं भवतीसुतक्षयकरो मातः कियन्तो ऽरयः
शाम्यं केवलमेतु दैवमधुना निष्पाण्डवा मेदिनी॥ १२६॥

नेपथ्ये। कलकलानन्तरम्। भो भो योधाः। निवेदयन्तु भवन्तः कौरवेश्वराय। इदं महत्कदनं प्रवृत्तम्। अलमप्रियश्रवणपराङ्मुखतया यतः कालानुरूपं प्रतिविधातव्यमिदानीम्। तथा हि।

त्यक्तप्राज्ञनरश्मिरङ्कितततनुः पार्थाङ्कितैर्मार्गणै-
र्वाहैः स्यन्दनवर्त्मनां परिचयादाकृष्यमाणः शनैः।
वार्तामङ्गपतेर्विलोचनजलैरावेदयन्पृच्छतां
शून्येनैव रथेन याति शिविरं शल्यः कुरून्कम्पयन्॥ १२७॥

दुर्योधनः। श्रुत्वा साशङ्कम्। सूत केनेदमविस्पष्टमशनिपातदारुणमुद्घोषितम्। को ऽत्र भोः।

प्रविश्य संभ्रान्तः

सूतः। हा हताः स्मः। इत्यात्मानमपातयत्।

दुर्योधनः। कथय कथय।

सूतः। आयुष्मन्। किमन्यत्।

शल्येन यथा शल्ये न मूर्छितः प्रविशता जनौघो ऽयम्।
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन॥ १२८॥

Digitized by Google

दुर्योधनः। क्व वयस्य क्व कर्णः। इति मोहमुपगतः।

गान्धारी। जाद समस्सस समस्सस।

संजयः। समाश्वसिहि समाश्वसिहि महाराज।

धृतराष्ट्रः। भोः कष्टं कष्टम्।

भीष्मे द्रोणे च निहते य आसीद्बलम्बनम्।
पुत्रस्य मे सुहृत्प्रेयान्राधेयः सो ऽप्ययं हतः ॥ १२९ ॥

वत्स समाश्वसिहि समाश्वसिहि। ननु भो हतविधे।

अन्धो ऽनुभूतशतपुत्रविपत्तिदुःखः
शोच्यां दशामुपगतः सह भार्ययाहम्।
अस्मिन्नशेषितसुहृद्गुरुबन्धुवर्गे
दुर्योधने ऽपि हि कृतो भवता निराशः ॥ १३० ॥

वत्स दुर्योधन समाश्वासय तपस्विनीं मातरम्।

दुर्योधनः। लब्धसंज्ञः।

अयि कर्ण कर्णसुखदां प्रयच्छ मे
गिरमुद्गिरन्निव मुदं मयि स्थिराम्।
सततावियुक्तमकृताप्रियं प्रियं
वृषसेनवत्सल विहाय यासि माम् ॥ १३१ ॥

पुनर्मोहमुपगतः। सर्वे समाश्वासयन्ति।

दुर्योधनः।

मम प्राणाधिके तस्मिन्नङ्गानामीश्वरे गते।
उच्छ्वसन्नपि लज्जे ऽहमाश्वासे तात का कथा ॥ १३२ ॥

अपि च।

शोचामि शोच्यमपि शत्रुहतं न वत्सं



Digitized by Google

दुःशासनं तमधुना न च बन्धुवर्गम्।
येनातिदुःश्रवमसाधु कृतं तु कर्णे
कर्तास्मि तस्य निधनं समरे कुलस्य ॥१३३॥

गान्धारी। जाद सिढिलेहि दाव खणमेत्तं बप्फमोक्खं।

धृतराष्ट्रः। वत्स क्षणमात्रं परिमार्ज्यताश्रूणि।

दुर्योधनः।

मामुद्दिश्य त्यजन्प्राणान्केनचिन्न निवारितः।
तत्कृते त्यजतो बाष्पं किं मे दीनस्य वार्यते ॥१३४॥

सूत केनेदमसंभावितमस्मत्कुलान्तकरं कर्म कृतं स्यात्।

सूतः। आयुष्मन्। एष किल जनः कथयति।

भूमौ निमग्नचक्रश्चक्रायुधसारथेः शरैस्तस्य।
निकृतः किलेन्द्रसूनोरस्मत्सेनाकृतान्तस्य ॥१३५॥

दुर्योधनः।

कर्णाननेन्दुस्मरणात्क्षुभितः शोकसागरः।
बाडवेनेव शिखिना पीयते क्रोधजेन मे ॥१३६॥

अम्ब तात प्रसीदतम्।

ज्वलनः शोकजन्मा मामयं दहति दुःसहः।
समानायां विपत्तौ मे वरं संशयितुं रणे ॥१३७॥

धृतराष्ट्रः। दुर्योधनं परिष्वज्य।

भवति तनय सत्यं संशयः साहसेषु
द्रवति हृदयमेतद्भीममुत्प्रेक्ष्य भीमम्।
अतिकृतिनिपुणं ते चेष्टितं मानशौड-
श्चलबकुलमरीणां संगरं का कृतो ऽस्मि ॥१३८॥

Digitized by Google

गान्धारी। तेण एव्व सुदसदकदत्तेण विम्रोदरेण समं समरं मग्गसि।

दुर्योधनः। अम्ब। तिष्ठतु तावद्वृकोदरः।

पापेन येन हृदयस्य मनोरथो मे
सर्वाङ्गचन्दनरसो नयनामलेन्दुः।
पुत्रस्तवाम्ब तव तात नयैकशिष्यः
कर्णो हृतः सपदि तत्र शराः पतन्तु ॥ १३९ ॥

सूत। अलमिदानीं कालातिपातेन सज्जं मे रथमुपहर। त्वं चेदृभ्यत्याणडवेभ्यस्तिष्ठ। गदामात्रसहाय एव समरभुवमवतरामि।

सूतः। अलमन्यथासंभावितेन। अयमहमागतोऽस्मि। इति निष्क्रान्तः।

धृतराष्ट्रः। वत्स दुर्योधन। यदि स्थिर एवास्मान्दग्धुमयं ते व्यवसायस्तत्संनिहितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम्।

दुर्योधनः। ननु भिषिक्त एव।

गान्धारी। कदरो उण सो जहिं एदं हदासं ओलम्बिस्सं।

धृतराष्ट्रः। किं वा शल्य उत वाश्वत्थामा।

दुर्योधनः। किं वा शल्येनोताश्वत्थाम्ना।

कर्णालिङ्गनदायी वा पार्थप्राणहरो ऽपि वा।
अनिवारितसंपातैरयमात्माश्रुवारिभिः ॥ १४० ॥

नेपथ्ये। कलकलं कृत्वा। भो भोः कौरवबलप्रधानयोधाः। अलमस्मानवलोक्य भयादितस्ततो गन्तुम्। कथयन्तु भवन्तः कस्मिन्नुद्देशे सुयोधनस्तिष्ठतीति। सर्वे ससंभ्रममाकर्णयन्ति।

प्रविश्य संभ्रान्तः

सूतः। आयुष्मन्।

प्राप्तावेकरथाद्रूढौ पृच्छन्तौ त्वामितस्ततः।

Digitized by Google

सर्वे। कश्च कश्च।

सूतः।

स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः ॥ १४१ ॥

गान्धारी। सभयम्। जाद किं एत्थ संपदं पडिबज्जिदव्वं।

दुर्योधनः। ननु संनिहितैवेयं गदा।

गान्धारी। हा हदम्हि अहं मन्दभाइणी।

दुर्योधनः। अलमिदानीं कार्पण्येन। संजय संजय रथमारोप्य पितरौ शिविरं प्रतिष्ठस्व। प्राप्तोऽस्मच्छोकापनोदप्रणायी जनः।

धृतराष्ट्रः। वत्स क्षणमेकं प्रतीक्षस्व यावदनयोर्भावमुपलभे।

दुर्योधनः। तात किमनेनोपलम्भेन। तदुन्मुच्यताम्।

धृतराष्ट्रो गान्धारी च किंचिदुत्थाय तिष्ठतः।

ततः प्रविशतो रथारूढौ भीमार्जुनौ।

भीमसेनः। भो भोः सुयोधनानुजीविनः। किमिति ससंभ्रममयथातथं संचरन्ति भवन्तः। अलमावयोः शङ्कया।

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनमरुत्याण्डवा यस्य दासाः।
राज्ञा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
ह्यास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ॥ १४२ ॥

धृतराष्ट्रः। संजय। दारुणः खलूपक्षेपः पापस्य।

संजयः। तात। कर्मणा कृतनिःशेषविप्रियाः संप्रति वाचा व्यवस्यन्ति।

दुर्योधनः। सूत कथय गत्वोभयोरयं तिष्ठतीति।

सूतः। यथाज्ञापयति। इति तावुपसृत्य। ननु भो वृकोदरार्जुनौ। एष महा-

Digitized by Google

राजस्तातेनाम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठतीति।

अर्जुनः। आर्य प्रसीद न युक्तं पुत्रशोकोपपीडितौ पितरौ पुनरस्मद्दर्शनेनोद्वेजयितुं तद्गच्छावः।

भीमसेनः। मूढ। अनुल्लङ्घनीयः सदाचारः। न युक्तमनभिवाद्य गुरूनगन्तुम्। उपसृत्य। संज्ञय पित्रोर्नमस्कृतिं श्रावय। अथवा तिष्ठ स्वयमेव श्रावयावः। इति रथादवतरतः। विभाव्य स्वकर्म मान्य च वन्दनीया गुरवः।

अर्जुनः। उपगम्य। तात। अम्ब।

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः।
रणशिरसि निकृत्ता तस्य राधासुतस्य
प्रणमति पितरौ वां फाल्गुनः पाण्डवोऽयम् ॥१४३॥

भीमसेनः।

चूर्णिताशेषकौरव्य क्षीबो दुःशासनासृजा।
भक्षिता सुयोधनस्योर्वोर्मीमो ऽयं शिरसाश्वति ॥ १४४ ॥

धृतराष्ट्रः। दुरात्मन्वृकोदर। न खल्विदं भवतैव केवलं सपत्नानामपकृतं यावत्क्षत्रं तावत्समरविजयिनो जिता हताश्च वीराः। तत्किमेवं विकत्थनाभिरस्मानुद्वेजयसि।

भीमसेनः। तात। अलं मन्युना।

कृष्णा केशेषु कृष्टा तव सदसि वधूः पाण्डवानां नृपैर्यैः
सर्वे ते क्रोधवह्नौ कृतशलभकुलावज्ञया येन दग्धाः।
हतस्माच्छ्रावये ऽहं न खलु भुजबलश्लाघया नापि दर्पात्
पुत्रैः पौत्रैश्च कर्मण्यतिगुरुणि कृते तात साक्षी त्वमेव ॥ १४५ ॥

दुर्योधनः। अरे रे महत्तनय। किमेवं वृद्धस्य राज्ञः पुरतो निन्दि-

Digitized by Google

तव्यमात्मकर्म श्लाघसे। अपि च।

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं क्ष्मापतीनां मम भुवनपतेराज्ञया द्यूतदासी।
अस्मिन्वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्यातिभारद्रविणगुरुगदं मामजित्वैव दर्पः ॥ १४६ ॥

आः दुरात्मन्। एष न भवसि। इति सक्रोधमुत्थाय हन्तुमिच्छति। धृतराष्ट्रो धृत्वोपवेशयति। भीमः क्रोधं नाटयति।

अर्जुनः। आर्य किमत्र क्रोधेन।

अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा।
कृतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा ॥ १४७ ॥

भीमसेनः। अरे रे भरतकुलकलङ्क।

अत्रैव किं न विशसेयमहं भवन्तं
दुःशासनानुगमनाय कुरुप्रलापिन्।
विघ्नं गुरुर्न कुरुते यदि मद्गदाग्र-
निर्भिद्यमानरणितास्थनि ते शरीरे ॥ १४८ ॥

अन्यच्च मूढ।

शोकं स्त्रीवन्नयनसलिलैर्यत्परित्याजितो ऽसि
भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतो ऽसि।
आसीदेतत्तव कुनृपतेः कारणं जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने ॥ १४९ ॥

दुर्योधनः। दुरात्मन्भरतकुलाधम द्यूतदास पाण्डवपशो। नाहं भवानिव विकत्थनाप्रगल्भः। किं तु।

द्रक्ष्यन्ति न चिरात्सुप्तं पाण्डवास्त्वां रणाजिरे।

Digitized by Google

मद्गदाभिन्नवक्षोऽस्थिवेणिकाभीमभूषणाम् ॥ १५० ॥

भीमसेनः। विहस्य। यद्येवं नाभ्रङ्केयो भवान्। तथापि प्रत्यासन्नमेव कथयामि।

पीनाभ्यां मद्भुजाभ्यां भ्रमितगुरुगदाघातसंचूर्णितोरोः
क्रूरस्याधाय पादं तव शिरसि नृणां पश्यतां श्वःप्रभाते।
वन्मुख्यभ्रातृचक्रोद्गलनगलदसृक्क्रन्दनेनानखाग्रं
स्त्यानेनार्द्रेण चाक्तः स्वयमनुभविता भूषणं भीममस्मि ॥ १५१ ॥

नेपथ्ये। भो भो भीमसेनार्जुनौ। एष खलु निकृताशेषारातिचक्र आक्रान्तपरशुरामाभिरामयशाः प्रतापतापितदिग्मण्डलस्थापितस्वजनः श्रीमानजातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति।

उभौ। किमाज्ञापयत्यार्यः।

पुनर्नेपथ्ये।

कुर्वल्वाता कृतानां रणशिरसि जना वह्निसाद्देहभारा-
नश्नून्मिश्रं कथंचिद्दहतु जलममी बान्धवा बान्धवेभ्यः।
मार्गन्तां ज्ञातिदेहान्कृतनरगरुने खण्डितान्गृध्रकङ्के-
रस्तं भास्वान्प्रयातः सरु रिपुभिरयं संक्रियन्तां बलानि ॥ १५२ ॥

उभौ। यदाज्ञापयत्यार्यः। इति निष्क्रान्तौ।

नेपथ्ये। अरे रे गाण्डीवाकर्षणबाकुशालिन्नर्जुनार्जुन क्वेदानीं गम्यते।

कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि
प्रौढं विक्रान्तमासीद्वन इव भवता शूरशून्ये रणे ऽस्मिन्।
स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनवकृतन्यस्तकेतेरुपेतः
कल्पाग्निः पाण्डवानां द्रुपदसुतचमूघस्मरो द्रौणिरस्मि ॥ १५३ ॥

धृतराष्ट्रः। आकर्ण्य सहर्षम्। वत्स दुर्योधन। द्रोणावधपरिभवोद्दीपितक्रो-

Digitized by Google

धपावकः पितुरपि समधिकबलः शिक्षावानमरोपमोऽयं महात्माश्वत्थामा प्राप्तः। तत्प्रत्युपगमनेन तावदयं संभाव्यतां वीरः।

गान्धारी। जाद पच्चुग्गच्छ एदं महाभाअं।

दुर्योधनः। तात। अम्ब। किमनेनाङ्गराजवधाशंसिना वृथाधीवनशस्त्रबलभरेण।

धृतराष्ट्रः। वत्स न खल्वस्मिन्काले पराक्रमवतामेवंविधानां वचनमात्रेण विरागमुत्पादयितुमर्हसि।

प्रविश्य

अश्वत्थामा। विजयतां कौरवाधिपतिः।

दुर्योधनः। उत्थाय। गुरुपुत्र। इत आस्यताम्। इत्युपवेशयति।

अश्वत्थामा। राजन्दुर्योधन।

कर्णेन कर्णसुभगं बहु यत्तदुक्तं
यत्संगरेषु विहितं विदितं त्वया तत्।
द्रौणिस्त्वधिज्यधनुरापतितो ऽभ्यमित्र-
मेषो ऽधुना त्यज नृपाप्रतिकारदुःखम् ॥१५४॥

दुर्योधनः। साभ्यसूयम्। आचार्यपुत्र।

अवसाने ऽङ्गराजस्य योद्धव्यं भवता किल।
ममाप्यन्तं प्रतीक्षस्व कः कर्णः कः सुयोधनः ॥१५५॥

अश्वत्थामा। कथमस्यापि स एव कर्णपक्षपातः। अस्मासु च परिभवः। राजन्कौरवेश्वर। एवं भवतु। इति निष्क्रान्तः।

धृतराष्ट्रः। वत्स क एष ते व्यामोहः। अस्मिन्काल एवंविधस्य महाभागस्याश्वत्थाम्नो वाक्यारुष्येणापरागमुत्पादयसि।

दुर्योधनः। किमस्याप्रियमनृतं मयोक्तं किं वा नेदं क्रोधस्थानम्। पश्य।

Digitized by Google

अकलितमकिमानं क्षत्रियैरात्तचापैः
समरशिरसि युष्मद्भाग्यदोषाद्विपन्नम्।
परिवदति समक्षं मित्रमङ्गाधिराजं
मम खलु कथयास्मिन्को विशेषो ऽर्जुने वा ॥ १५६ ॥

धृतराष्ट्रः। अथवा तवापि वत्स को ऽत्र दोषः। अवसानमिदानीं भरतकुलस्य। गान्धारि। संजय। किमिदानीं करोमि मन्दभाग्यः। विचिन्त्य। भवत्वेवं तावत्। संजय मद्वचनाद्भूरि भारद्वाजमश्वत्थामानम्।

स्मरति न भवान्पीतं स्तन्यं चिराय सहामुना
मम च मलिनं क्षौमं बाल्ये त्वदङ्गविवर्तनैः।
अनुज्ञनिधनस्फीताच्छोकादतिप्रणयाच्च त-
द्विकृतवचने मास्मिन्क्रोधश्चिरं क्रियतां त्वया ॥ १५७ ॥

संजयः। यदाज्ञापयति तातः। इत्युत्थितः।

धृतराष्ट्रः। अपि चेदमन्यत्त्वया वक्तव्यम्।

यन्मोचितस्तव पिता वितथेन शस्त्रं
यत्तादृशः परिभवः स तथाविधो ऽभूत्।
एतद्विचिन्त्य बलमात्मनि पौरुषं च
दुर्योधनोक्तमपकाय विधास्यसीति ॥ १५८ ॥

संजयः। यदाज्ञापयति तातः। इति निष्क्रान्तः।

दुर्योधनः। सूत सांग्रामिकं मे रथमुपकल्पय।

सूतः। यदाज्ञापयत्यायुष्मान्। इति निष्क्रान्तः।

धृतराष्ट्रः। गान्धारि। इतो वयं मद्राधिपतेः शल्यस्य शिविरमेव गच्छावः। वत्स त्वमप्येवं कुरु।

इति परिक्रम्य निष्क्रान्ताः सर्वे।

॥ इति पञ्चमो ऽङ्कः ॥



Digitized by Google

ततः प्रविश्यासनस्थो युधिष्ठिरो द्रौपदी चेटी पुरुषश्च।

युधिष्ठिरः। विचिन्त्य निःश्वस्य च।

6.1. तीर्णे भीष्ममहार्णवे कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम्।
भीमेन प्रियसाहसेन रभसादल्पावशिष्टे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥१५९॥ 159

द्रौपदी। सबाष्पम्। पच्चालिए त्ति किं ण भणिदं।

युधिष्ठिरः। कृष्णे ननु मया। पुरुषमवलोक्य। बुधक।

पुरुषः। देव। आज्ञापय।

युधिष्ठिरः। उच्यतां सहदेवः। क्रुद्धस्य वृकोदरस्यापर्युषितदारुणां प्रतिज्ञामुपलभ्य प्रनष्टस्य मानिनः कौरवराजस्य पदवीमीक्षितुमतिनिपुणामतयस्तेषु तेषु स्थानान्तरेषु यथार्थाभिज्ञाश्च सुसचिवाश्च भक्तिमन्तः पटुपटहरवव्यक्तघोषणाः सुयोधनपदसंचारवेदिनः प्रतिश्रुतधनपूजाप्रत्युपक्रियाश्चरन्तु समन्तपञ्चकम्। अपि च।

पङ्के वा सैकते वा सुनिभृतपदवीवेदिनो यान्तु दाशाः
कक्षेषु क्षुण्णवीरुन्निचयपरिचया बल्लवाः संचरन्तु।
व्याधा व्याघ्राटवीषु स्वपरपदविदो ये च रन्ध्रेष्वभिज्ञा
ये सिद्धव्यञ्जना वा प्रतिमुनिनिलयं ते च चाराश्चरन्तु ॥१६०॥

Digitized by Google

पुरुषः। यदाज्ञापयति देवः।

युधिष्ठिरः। एवं च वक्तव्यः सकृदेवः।

ज्ञेया रक्षःशङ्कितमालपन्तः
सुप्ता रुगार्ताश्च वने विचेयाः।
त्रासो मृगाणां वयसां विरावो
नृपाङ्कपादप्रतिमाश्च यत्र ॥१६१॥

पुरुषः। यदाज्ञापयति देवः। इति निष्क्रम्य पुनः प्रविश्य सहर्षम्। देव पाञ्चालकः प्राप्तः।

युधिष्ठिरः। त्वरितं प्रवेशय।

पुरुषः। निष्क्रम्य पाञ्चालकेन सह प्रविश्य। एष देवः। उपसर्पतु पाञ्चालकः।

पाञ्चालकः। जयतु जयतु देवः। प्रियमावेदयामि महाराजाय देव्यै च।

युधिष्ठिरः। भद्र पाञ्चालक। कच्चिदासादिता तस्य दुरात्मनः कौरवाधमस्य पदवी।

पाञ्चालकः। देव न केवलं पदवी। स एव दुरात्मा देवीकेशाम्बराकर्षणमहापातकप्रधानहेतुरुपलब्धः।

युधिष्ठिरः। सहर्षं पाञ्चालकं परिष्वज्य। साधु भद्र प्रियमावेदितम्। अथ दर्शनगोचरं गतः।

पाञ्चालकः। देव समरगोचरं पृच्छ।

द्रौपदी। सभयम्। कहं समरगोअरो वट्टइ मे णाहो।

युधिष्ठिरः। साशङ्कम्। सत्यं समरगोचरो मे वत्सः।

पाञ्चालकः। सत्यं किमन्यथा वद्यते महाराजाय।

युधिष्ठिरः।

Digitized by Google

त्रस्तं विनापि विषयाद्गुरुविक्रमस्य
चेतो विवेकपरिमन्थरतां प्रयाति।
ज्ञानामि चोद्धतगदस्य वृकोदरस्य
सारं रणेषु विजयः परिशङ्कितश्च ॥ १६२ ॥

द्रौपदीमवलोक्य मुखादस्या बाष्पमपनयति। अयि सुक्षत्रिये।

गुरूणां बन्धूनां क्षितिपतिसकृस्नस्य च पुरः
पुराभूदस्माकं नृपसदसि यो ऽयं परिभवः।
प्रिये प्रायस्तस्य द्वितयमपि पारं गमयितुं
क्षयः प्राणानां वा कुरुपतिपशोस्तस्य निधनम् ॥ १६३ ॥

अथवा कृतं संदेहेन।

नूनं तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा।
बध्यते केशपाशस्ते स चास्याकर्षणप्रभुः ॥ १६४ ॥

पाञ्चालक कथय कथय कथमुपलब्धः स दुरात्मा कस्मिन्नुद्देशे किमधुना प्रवृत्तमिति।

द्रौपदी। भद्द कहेहि कहेहि।

पाञ्चालकः। शृणोतु देवो देवी च। अस्तीह देवेन कृते मद्राधिपे शल्ये गान्धारराजशलभकुले सहदेवानलं प्रविष्टे सेनापतिनिधननराक्रन्दविरलयोधोज्झितासु समरभूमिषु रिपुपराजयोद्धतचलितविचित्रपराक्रमासादितविमुखारातिचक्रासु धृष्टद्युम्नाधिष्ठितासु च युष्मत्सेनासु प्रनष्टेषु कृपकृतवर्माश्वत्थामसु तथा दारुणां प्रतिज्ञामुपलभ्य कुमारवृकोदरस्य न ज्ञायते क्वापि प्रलीनः स दुरात्मा कौरवाधमः।

युधिष्ठिरः। ततस्ततः।

द्रौपदी। अग्गदो कहेहि।

Digitized by Google

पाञ्चालकः। अवधत्तां देवो देवी च। ततश्च भगवता वासुदेवेनाधिष्ठितावेकरथारूढौ कुमारभीमार्जुनौ समक्षात्समस्तपञ्चकं पर्यटितुमारब्धौ तमनासादितवन्तौ च। अनन्तरं दैवमनुशोचति मादृशे भृत्यवर्गे दीर्घमुष्णं च निश्वसति कुमारबीभत्सौ जलधरसमयनिशासंचारितडित्प्रकरपिङ्गलैः कटाक्षैरादीपयति गदां वृकोदरे यत्किंचनकारितामधिक्षिपति विधेर्भगवति नारायणे कश्चित्संविदितः कुमारस्य मारुतेरुल्लिखितमांसभारः प्रत्यग्रविशसितमृगलोहितचरणनिवसनस्वरमाणो ऽन्तिकमुपेत्य पुरुषः परुषश्वासग्रस्तार्धश्रुतवर्णानुमेयपदया वाचा कथितवान्। देव कुमार। अस्मिन्मरुतो ऽस्य सरसस्तीरे पद्भ्यां समवतीर्णप्रतिबिम्बे तयोरेका जलोत्तीर्णा न द्वितीया। परत्र तु कुमारः प्रमाणमिति। ततः ससंभ्रमं प्रस्थिताः सर्वे वयं तमेव पुरस्कृत्य गत्वा च सरस्तीरं परिज्ञाय सुयोधनपदलाञ्छितां पद्वीमासाद्य भगवता वासुदेवेनोक्तम्। वृकोदर। जानाति किल सुयोधनः सलिलस्तम्भिनीं विद्यां नूनं तेन ह्रदयात्सरसीमेनामधिशयितेन भवितव्यम्। एतच्च वचनमुपश्रुत्य बलानुज्ञस्य सकलदिक्प्रतिपूरितातिरिक्तमुद्भ्रान्तसकलसलिलचारिचक्रं त्रासोद्वृत्तनक्रमालोडितं सरःसलिलं भैरवं च गर्जित्वा कुमारवृकोदरेणाभिहितम्। अरे रे वृथाप्रख्यातालीकपौरुषाभिमानिन्पञ्चालराजतनयाकेशाम्बराकर्षणमहापातकिन्धार्तराष्ट्रापसद।

जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणितसुरातृष्णीबं रिपुं भाषसे।
दर्पान्धो मधुकैटभद्विषि रुषावप्युद्यतं चेष्टसे
मत्त्रासान्नृपशो विहाय समरं पङ्के ऽधुना लीयसे ॥१६५॥

अपि च। भो मानान्ध कौरवाधम।

Digitized by Google

पाञ्चाल्या मन्युवह्निः स्फुटमुपशमितप्राय एष प्रसक्त
प्रोन्मुक्तैः केशहस्तैर्हृतपतिषु मया कौरवान्तःपुरेषु।
भ्रातुर्दुःशासनस्य स्रवदसृगुरसः पीयमानं निरीक्ष्य
क्रोधात्किं भीमसेने विकृतमसमये यत्नयास्तो ऽभिमानः ॥ १६६ ॥

द्रौपदी। अबणीदो मे णाह मक्खू जइ पुणो वि सुलहं दंसणं भविस्सदि।

युधिष्ठिरः। कृष्णे नामङ्गलानि व्याहर्तुमर्हस्यस्मिन्काले। भद्र। ततस्ततः।

पाञ्चालकः। देव। ततश्चैवं भाषमाणेन वृकोदरेण वीर्यक्रोधोद्धतभ्रमितभीषणगदापरिघपाणिना सहसैवोल्लङ्घिततीरमुत्सन्ननलिनमाविद्धमूर्छितग्राहमुद्भ्रान्तसमस्तशकुन्तमतिभैरवं वेगभ्रमितवारिसंचयमायतमपि सरः समन्तादवलोडितम्।

युधिष्ठिरः। भद्र। तथापि नोत्थितः।

पाञ्चालकः। देव। कथं नोत्थितः।

त्यक्तोत्थितः सरभसं सरसः स मूल-
मुद्भ्रान्तकोपदहनोग्रविषस्फुलिङ्गः।
आयस्तभीमभुजमन्दरवेल्लनाभिः
क्षीराम्बुधेः सुमथितादिव कालकूटः ॥ १६७ ॥

युधिष्ठिरः। साधु सुन्नत्रिय साधु।

द्रौपदी। पडिबण्णो समरो ण वा।

पाञ्चालकः। उत्थाय चास्मात्सलिलाशयात्करयुगलोत्क्षिप्ततोरणीकृतभीमगदः कथयति स्म। मारुते किं भवतो भयेन प्रलीनं मन्यसे दुर्योधनम्। मूढ। अनभिकृतपाण्डुपुत्रः प्रकाशं लज्जमानो विश्रमितुम-

Digitized by Google

ध्यवसितवानस्मि पातालम्। एवं चोक्ते वासुदेवकिरीटिभ्यां द्वावप्यन्तः-सलिलं निषिद्धसमारम्भौ स्थलमुत्तारितौ भीमसुयोधनौ। आसीनश्च कौरवराजः क्षितितले गदां निक्षिप्य निकृतकुरुशतगजवाजिनरशतकलेवरसंमर्दसंपतितगृध्रकङ्कजम्बूकमुत्सन्नसुयोधनबलमस्मद्वीरमुक्तसिंहनादसंवलितसमरतूर्यमबान्धवममित्रबान्धवकौरवं संग्रामस्थानमवलोक्यायतमुष्णं च निश्वसितवान्। ततश्च वृकोदरेणाभिहितम्। अयि भोः कौरवराज। कृतं बन्धुजनमन्युना मैवं विषादं कृथाः। पर्याप्ताः पाण्डवाः सो ऽकृमसकृाय इति। किं च।

पञ्चानां मन्यसे ऽस्माकं यं सुयोधं सुयोधन।
दंशितस्यात्तशस्त्रस्य तेन ते ऽस्तु रणोत्सवः ॥१६८॥

इत्थं च श्रुत्वा किंचिदश्रुपातान्वितां दृष्टिं कुमार्योर्निक्षिप्योक्तवान्।

कर्णदुःशासनवधात्तुल्यावेव युवां मम।
अप्रियो ऽपि प्रियो योद्धुं त्वमेकः प्रियसाकृसः ॥१६९॥

इत्युत्थाय परस्परक्रोधाज्ञेपपरुषवाकुलकृप्रसारितघोरसंग्रामौ चित्रगदापरिघभासुरभुजभरौ मण्डलैर्विकृर्तुमारब्धौ भीमदुर्योधनौ। अकृं च देवेन चक्रपाणिना देवसकाशमनुप्रेषितः। आकृ च देवो देवकीनन्दनः। अपर्युषितप्रतिज्ञे मारुतौ प्रनष्टे कौरवराजे मकृानासीन्नो विषादः। संप्रति पुनर्भीमसेनेनासादिते सुयोधने निष्कण्टकीभूतं भुवनतलं परिकलयतु भवान्। अभ्युदयोचिताश्च प्रवर्त्यन्तामनवरतमङ्गलसमारम्भाः। कृतं संदेकृेन।

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते च कवरीबन्धे करोतु त्वरणम्।
रामे घोरकुठारभासुरकरे क्षत्रद्रुमच्छेदिनि

Digitized by Google

क्रोधान्धे च वृकोदरे परिपतत्याज्ञौ कुतः संशयः ॥१७०॥

द्रौपदी। सबाष्पम्। जं देवो तिक्कअणणाहो आणवेदि तं च कहं अम्हाहा भविस्सदि।

पाञ्चालकः। न केवलमियमाशीः। असुरनिषूदनस्यादेशोऽपि।

युधिष्ठिरः। को हि नाम भगवता संदिष्टं विकल्पयति। कः को ऽत्र भोः।

प्रविश्य

कञ्चुकी। आज्ञापयतु देवः।

युधिष्ठिरः। देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य विजयमङ्गलाशंसया प्रवर्त्यन्तां तदुचिताः समारम्भाः।

कञ्चुकी। यदाज्ञापयति देवः। सोत्साहं परिक्रम्य। भो भोः संविधातृणां पुरःसरा यथाप्रधानमन्तर्वेश्मनि दौवारिकाश्च। एष खलु भुजबलपरिक्षेपोत्तीर्णकौरवपरिभवसागरस्य निर्व्यूढदुर्धरप्रतिज्ञाभारस्य सुयोधनानुजशतोद्दूननप्रभञ्जनस्य बलिनः प्राभञ्जनेर्दुःशासनोरःस्थलविदलननरसिंहस्य दुर्योधनोरुस्तम्भभङ्गविनिश्चितविजयस्य वृकोदरस्य स्नेहकृपणपातिना मनसा मङ्गलानि कर्तुमाज्ञापयति देवो युधिष्ठिरः। आकाशे। किं ब्रूथ। सर्वतोऽधिकतरमपि प्रवृत्तं किं वा नालोकयसीति। साधु पुत्रकाः साधु। अनुक्तहितकारिता हि प्रकाशयति मनोगतां स्वामिभक्तिम्।

युधिष्ठिरः। आर्य जयंधर।

कञ्चुकी। आज्ञापयतु देवः।

युधिष्ठिरः। गच्छ प्रियाव्यापकं पाञ्चालकं पारितोषिकेण परितोषय।

Digitized by Google

कञ्चुकी। यदाज्ञापयति देवः। इति पाञ्चालकेन सह निष्क्रान्तः।

द्रौपदी। महाराअ किं णिमित्तं डण णाकभीमसेणेण सो डुराआरो भणिदो पञ्चाणं बि अम्हाणं जेण दे रोअदि तेण सह संगामो होदु त्ति। कहं णाम एआणं महीसुदाणं एअदरो पत्थिदो तेण संगामो भवे तदो अच्चाहिदं भवे।

युधिष्ठिरः। कृष्णे। एवं मन्यते जरासंधघाती कृतसकलसुहृद्बन्धुवीरानुजराजन्यासु कृपकृतवर्माश्वत्थामशेषास्वेकादशस्वक्षौहिणीषबान्धवः शरीरमात्रविभवः कदाचिदुत्सृष्टनिजाभिमानो धार्तराष्ट्रः परित्यजेदायुधं तपोवनं वा व्रजेत्संधिं वा पितृमुखेन याचेत। एवं सति सुदूरमतिक्रान्तः प्रतिज्ञाभारो भवेत्मकलरिपुक्षयस्येति। समरं प्रतिपत्तुं पञ्चानामपि पाण्डवानामेकस्यापि नैव क्षमः सुयोधनः। शङ्के चाहं गदायुद्धं वृकोदरस्यैवानेन। पश्य सुक्षत्रिये।

क्रोधोद्दूर्णगदस्य नास्ति सदृशः सत्यं रणे मारुतेः
कौरव्ये कृतहस्तता पुनरियं देवे यथा सीरिणि।
स्वस्त्यस्तूद्धतधार्तराष्ट्रनलिनीनागाय वत्साय मे
शङ्के तस्य सुयोधनेन समरं नैवेतरेषामहम्॥ १७१॥

नेपथ्ये। तृषितोऽस्मि भोस्तृषितोऽस्मि संभावयतु कश्चित्सलिलच्छायासंप्रदानेन माम्।

युधिष्ठिरः। आकर्ण्य। कः को ऽत्र भोः।

प्रविश्य

कञ्चुकी। आज्ञापयतु देवः।

युधिष्ठिरः। ज्ञायतां किमेतत्।

कञ्चुकी। यदाज्ञापयति देवः। इति निष्क्रम्य पुनः प्रविश्य। देव नुन्मानतिथि-



Digitized by Google

रुपस्थितः।

युधिष्ठिरः। शीघ्रं प्रवेशय।

कञ्चुकी। यदाज्ञापयति देवः। इति निष्क्रान्तः।

ततः प्रविशति मुनिवेषधारी चार्वाको नाम राक्षसः।

राक्षसः। आत्मगतम्। एषोऽहमस्मि भोः सुयोधनस्य परं मित्रं पाण्डवान्वञ्चयितुं भ्रमामि। प्रकाशम्। भोस्तृषितोऽस्मि संभावयतु मां कश्चिज्जलच्छायाप्रदानेन। इति राक्षसः समीपमुपसर्पति। सर्व उत्तिष्ठन्ति।

युधिष्ठिरः। मुने। अभिवादये।

राक्षसः। अकालोऽयं समुदाचारस्य जलप्रदानेन संभावयतु माम्।

युधिष्ठिरः। मुने। उपविश्यतामासने।

राक्षसः। उपविश्य। ननु भवतापि क्रियतामासनपरिग्रहः।

युधिष्ठिरः। कः को ऽत्र भोः।

प्रविश्य गृहीतभृङ्गारः

कञ्चुकी। उपसृत्य। महाराज शिशिरसुरभिसलिलपूर्णोऽयं भृङ्गारः पानभाजनं चेदम्।

युधिष्ठिरः। मुने। निर्वर्त्यतामुदन्याप्रतीकारः।

राक्षसः। पादौ प्रक्षाल्योपस्पृशन्। भो भोः क्षत्रियस्त्वमिति मन्ये।

युधिष्ठिरः। सम्यग्वेत्ति भवान्। क्षत्रिय एवास्मि।

राक्षसः। प्रतिदिनसुलभस्वजननविनाशनेषु संग्रामेषु युष्मत्तो नादेयं सलिलादिकम्। भवतु क्षायतैवानया सरस्वतीशिशिरतरंगस्पृशा च मरुतानेन विगतक्लमो भविष्यामि।

द्रौपदी। बुद्धिमदिए वीएहि मक्केस्सिं तालविन्तेण। चेटी तथा करोति।

राक्षसः। भवति। अनुचितोऽयमस्मासु समुदाचारः।

Digitized by Google

राज्ञा। कथं पुनरेवं भवान्परिश्रान्तः।

राक्षसः। मुनिजनसुलभेनैव कौतूहलेन तत्रभवतां महाक्षत्रियाणां द्वन्द्वयुद्धं विलोकयितुं पर्यटामि समन्तपञ्चकम्। अद्य तु बलवत्तया शरदातपस्यापर्याप्तमेवावलोक्य गदायुद्धमर्जुनसुयोधनयोरागतो ऽस्मि।

सर्वे विषादं नाटयन्ति।

कञ्चुकी। मुने न खल्वेवम्। भीमसुयोधनयोरिति कथय।

राक्षसः। आः अविदितवृत्तान्तमिव कथं मामाक्षिपसि।

युधिष्ठिरः। महर्षे कथय कथय।

राक्षसः। क्षणमात्रं विश्रम्य सर्वं कथयामि भवते न पुनरस्य।

युधिष्ठिरः। कथय किमर्जुनसुयोधनयोः।

राक्षसः। ननु पूर्वमेव कथितं मया प्रवृत्तं गदायुद्धमिति।

राज्ञा। न भीमसेनसुयोधनयोरिति।

राक्षसः। वृत्तं तत्।

युधिष्ठिरो द्रौपदी च मोहमुपगतौ।

कञ्चुकी। सलिलमासिच्य। समाश्वसितु देवो देवी च।

चेटी। समस्ससिदु समस्ससिदु देवी। उभौ संज्ञां लभतः।

युधिष्ठिरः। किं कथयसि मुने वृत्तं भीमसुयोधनयोर्गदायुद्धमिति।

द्रौपदी। भअवं कहेहि किं वुत्तं त्ति।

राक्षसः। कञ्चुकिन्कौ पुनरेतौ।

कञ्चुकी। ब्रह्मन्नेष देवो युधिष्ठिरः। इयं पाञ्चालराजतनया।

राक्षसः। आः दारुणमुपक्रान्तं मया नृशंसेन।

द्रौपदी। हा णाह भीम। इति मोहमुपगता।

कञ्चुकी। किं नाम कथितम्।

चेटी। समस्ससिदु देवी।

Digitized by Google

युधिष्ठिरः। साक्षम्। ब्रह्मन्।

पदे संदिग्ध एवास्मिन्दुःखमास्ते युधिष्ठिरः।
वत्सस्य निश्चिते तत्त्वे प्राणत्यागादहं सुखी ॥ १७२ ॥

राक्षसः। सानन्दमात्मगतम्। अयं मे यत्नः। प्रकाशम्। यद्येवमवश्यं कथनीयं संक्षेपेण कथयामि। न युक्तं बन्धुव्यसनं विस्तरेणावेदयितुम्।

युधिष्ठिरः। अश्रूणि मुञ्चन्।

सर्वथा कथय ब्रह्मन्संक्षेपाद्विस्तरेण वा।
वत्सस्य किमपि श्रोतुमेष दत्तः क्षणो मया ॥ १७३ ॥

राक्षसः। श्रूयताम्।

तस्मिन्कौरवभीमयोर्गुरुगदाघोरधनौ संयुगे

द्रौपदी। सहसोत्थाय। तदो तदो।

राक्षसः। स्वगतम्। कथं पुनरनयोर्लब्धसंज्ञतामपनयामि। प्रकाशम्।

सीरी सत्वरमागतश्चिरमभूत्तस्याग्रतः संगरः।
आलम्ब्य प्रियशिष्यतां तु कृलिना संज्ञा रहस्याकिता
यामासाद्य कुवृत्तमः प्रतिकृतिं दुःशासनारौ गतः ॥ १७४ ॥

युधिष्ठिरः। हा वत्स वृकोदर। इति मोहमुपगतः।

द्रौपदी। हा णाह भीमसेण हा मम परिहवपडिआरपरिचत्तजी-विअ जडासुरबअहिडिम्बकिम्मीरकीचअजरासंधणिसूदण णाह सोअ-न्धिआहरणचाडुआर देहि मे पडिवअणं। इति मोहमुपगता।

कञ्चुकी। साक्षम्। हा कुमार भीमसेन धार्तराष्ट्रकुलकमलिनीप्रालेय-वर्ष। महाराज समाश्वसिहि समाश्वसिहि। भद्रे समाश्वासयात्रभवतीम्। महर्षे त्वमप्याश्वासय महाराजम्।

राक्षसः। स्वगतम्। आश्वासयामि प्राणांस्त्याजयितुम्। प्रकाशम्। अयि भो

Digitized by Google

भीमाग्रज। क्षणमेकमाधीयतामाश्वासः कथाशेषो ऽप्यस्ति।

युधिष्ठिरः। समाश्वस्य। महर्षे किमस्ति कथावशेषः।

राक्षसः। ततश्च कृते तस्मिन्सुक्षत्रिये वीरसुलभां गतिमुपगते समग्रसंगलितं भ्रातृवधशोकजं बाष्पमुत्सृज्य भ्रातृवधशोकादपक्रम्य गाण्डीवं प्रत्यग्रदत्तजन्मार्चितां तामेव गदां भ्रातृहस्तात्सत्वरादाकृष्य निवार्यमाणः संधित्सुना वासुदेवेनागच्छागच्छेति सोपहासं भ्रमितगदाटंकारसंमूर्छितगम्भीरवचनधनिनाह्वयमानः कौरवराजेन तृतीयो ऽनुजस्ते किरीटी योद्धुमारब्धः। तथा कृतिनस्तस्य गदायां तस्य निधनमुत्प्रेक्षमाणेन कामपालेनार्जुनपक्षपाती देवकीसूनुः प्रयत्नात्स्वरथमारोप्य द्वारकां नीतः।

युधिष्ठिरः। साधु भो अर्जुन। तदेव प्रतिपन्ना वृकोदरानुगमनपदवी गाण्डीवं परित्यजता। अहं पुनः केनोपायेन प्राणापगममहोत्सवमुत्सहिष्ये।

द्रौपदी। हा णाह भाउवच्छल। ण जुत्तं भादरं असिक्खिदं गदाए सत्तुणो मुहं गच्छन्तं उवेक्खिदुं। मोहमुपगता।

राक्षसः। ततश्चाहम्।

युधिष्ठिरः। किमतः परं श्रुतेन। हा तात भीमसेन जतुगृहसमुद्रसंतरणयानपात्र हा किर्मीरहिडिम्बासुरजरासंधजयमल्ल हा कीचकसुयोधनानुजकुलकमलिनीकुञ्जर हा द्यूतपणप्रणयिन्मम शरीरस्थितिपरिखेदशङ्कासूदन हा मदाज्ञासंपादक हा कौरववनदावानल।

निर्लज्जस्य दुरोदरव्यसनिनो वत्स त्वया सीदता
भक्त्या मे समदद्विपायुतबलेनाङ्गीकृता दासता।
किं नामापकृतं मया तदधिकं त्वय्यप्य निर्वत्सलं

Digitized by Google

त्यक्त्वानाथमबान्धवं सपदि मां येनासि दूरं गतः ॥१७५॥

द्रौपदी। उत्थाय। महाराज किं एदं वट्टइ।

युधिष्ठिरः। कृष्णे किमन्यत्।

स कीचकनिषूदनो बककिरिडम्बकिर्मीरहा
मदान्धमगधाधिपद्विरदसंधिभेदाशनिः।
गदापरिघशोभिना भुजयुगेन तेनान्वितः
प्रियस्तव ममानुजो ऽर्जुनगुरुर्गतो ऽस्तं किल ॥१७६॥

द्रौपदी। णाह सयं किल मे केसा संभ्रमिदव्वा। णा जुत्तं वीरस्स खत्तिअस्स पडिञ्ञादं सिढिलेदुं। ता पडिबालेहि मं जाव उबसप्पामि।

इति पुनर्मोहमुपगता।

युधिष्ठिरः। आकाशे। अम्ब पृथे। श्रुतो ऽयं तव पुत्रस्य समुदाचारः। मामेकमनाथं विलपन्तमुत्सृज्य क्वापि गतः। तात जरासंधशत्रो। किं नाम वैपरीत्यमेतावता कालेनात्यायुषि त्वयि समालोकितं जनेन। अथवा मयैव बह्वुपलब्धम्।

दत्त्वा मे करदीकृताखिलनृपां यन्मेदिनीं लब्धवान्
द्यूते यच्च पणीकृतो ऽपि हि मया न क्रुध्यसि प्रीयसे।
स्थित्यर्थं मम मत्स्यराजभवने प्राप्तो ऽसि यत्सूदतां
तान्येतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते ॥१७७॥

मुने किं कथयसि। तस्मिन्कौरवभीमयोः। इति पठति।

राक्षसः। एवमेतत्।

युधिष्ठिरः। विगलन्ति भागधेयानि। भगवन्कामपाल कृष्णाग्रज।

ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो
दृष्टं सख्यं तदपि गणितं नानुजस्यानुजे मे।

Digitized by Google

तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
को ऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम् ॥ १७८ ॥

द्रौपदीमुपगम्य। अयि पाञ्चालि। उत्तिष्ठोत्तिष्ठ। समानदुःखावावां भवावः। मूर्ख्या किं मामेवमतिसंधत्से।

द्रौपदी लब्धसंज्ञा। बन्धेदु णाहो दुज्जोहणरुहिरोएहेण कत्थेण दुस्सासणमोइदं मे केसकत्थं। कज्जे बुद्धिमदिए तव पच्चक्खं एव्व णाहेण पडिण्णादं। कञ्चुकिनमुपेत्य। संदिट्ठं मे दाव देवईणन्दणेण केसग्गणा आरम्भीअदु त्ति ता उबणेहि मे फुल्लदामाइं विरएहि दाव कवरिं करेहि भग्गवदो पुरिसोत्तमस्स वग्गणं ण हि अलीअं मन्देदि सो। अहवा किं मए अदिसंतत्ताए भणिदं अट्टरगदं अज्जउत्तं अणुगमिस्सं। युधिष्ठिरमुपेत्य। महाराज्ञ आदीबग्ग मे चिदं। तुमं बि खत्तधम्मं अणुवट्टन्तो एव्व मे णाहस्स जीविअहरस्स अरिमुहो होहि।

युधिष्ठिरः। युक्तमाह पाञ्चाली। कञ्चुकिन्क्रियतामियं तपस्विनी चितासंविभागेन सत्क्रियवेदना। ममापि सज्जं धनुरुपनय। अलमथवा धनुषा।

तस्यैव देहरुधिरोक्षितपाटलाङ्गी-
मादाय संप्रति गदामपविद्धचापम्।
भ्रातृप्रियेण कृतमद्य यदर्जुनेन
श्रेयो ममापि हि तदेव कृतं ज्यायेन ॥ १७९ ॥

राक्षसः। राजन्। रिपुजयविमुखं ते यदि चेतस्तदा यत्र तत्र वा प्राणत्यागं कुरु। वृथा तत्र गमनम्।

कञ्चुकी। सरोषम्। धिग्मुनिजनासदृशं राक्षसस्य सदृशं भवता व्याहृतम्।

Digitized by Google

राक्षसः। स्वगतम्। किं ज्ञातो ऽहमनेन। प्रकाशम्। भोः कञ्चुकिन्। एतद्ब्रवीमि। तयोर्गदायाः खलु युद्धं प्रवृत्तमर्जुनदुर्योधनयोः। जानामि च तयोर्गदायां भुजसारम्। दुःखितस्य राजर्षेरपरमनिष्टश्रवणं परिहरन्नेवं ब्रवीमि।

युधिष्ठिरः। बाष्पं विमुञ्चन्। साधु महर्षे साधु स्निग्धमभिहितम्।

कञ्चुकी। महाराज शोकान्धतया देवकल्पेनापि देवेन त्वया प्राकृतेनेव त्यज्यते क्षत्रधर्मः।

युधिष्ठिरः। आर्य जयंधर।

शक्ष्यामि तौ परिघपीवरबाहुदण्डौ
वित्तेशशक्रपुरदर्शितवीर्यसारौ।
भीमार्जुनौ क्षितितले प्रविचेष्टमानौ
द्रष्टुं तयोश्च निधनेन रिपुं कृतार्थम् ॥ १८० ॥

अयि पाञ्चालराजतनये मद्दुर्नयप्राप्तशोच्यदशे। यथा संदीप्यते पावकस्तथा सक्तावेव बन्धुजनं संभावयावः।

द्रौपदी। अज्ज करेसु दारुसंचअं। कहं ण को वि महाराअस्स वअणं करेदि। हा णाह अज्ज एस तुए विणा महाराओ परिअणेण वि परिहवीअदि।

राक्षसः। सदृशमिदं भरतकुलवधूनां पत्युरनुसरणम्।

युधिष्ठिरः। महर्षे। न कश्चिच्छृणोति तावदावयोर्वचनम्। इन्धनप्रदानेन प्रसादः क्रियताम्।

राक्षसः। मुनिजनविरुद्धमिदम्। स्वगतम्। पूर्णा मे मनोरथा यावदनुपलक्षितः समीपे ऽहमिन्धनमादीपयामि। प्रकाशम्। राजन्न शक्नुमो वयमिहैव स्थातुम्। इति निष्क्रान्तः।

Digitized by Google

युधिष्ठिरः। कृष्णे। न कश्चिदस्मद्वचनं करोति। भवतु स्वयमेवाहं दारुसंचयं कृत्वा चितामादीपयामि।

द्रौपदी। तुवरदु तुवरदु महाराओ।

नेपथ्ये कलकलः।

द्रौपदी। सभयमाकर्ण्य। महाराअ। कस्स वि एसो बकुलदप्पिदस्स णिग्घोसो सुणीअदि। अवरं वि अप्पिअं सुणिदुं अत्थि णिब्बन्धो तदो विलम्बीअदि।

युधिष्ठिरः। न खलु विलम्ब्यते। उत्तिष्ठ। इति सर्वे परिक्रामन्ति।

युधिष्ठिरः। अयि पाञ्चालि। अम्बायाः सपत्नीजनस्य च किंचित्संदिश्य निवर्तय परिजनम्।

द्रौपदी। एवं महाराअ अम्बाए संदिसिस्सं। जो सो बअक्खिडिम्बकिम्मीरअजरासंधजयमल्लो वि मल्लमपुत्तो मम दे कदासाए पक्खवादेण परलोअं गदो ऽत्ति।

युधिष्ठिरः। भद्रे बुद्धिमतिके। उच्यतामस्मद्वचनादम्बा।

येनासि तत्र जतुवेश्मनि दीप्यमाने
निर्वासिता सह सुतैर्भुजयोर्बलेन।
तस्य प्रियस्य बलिनस्तनयस्य पापं
को ऽन्यस्तवाम्ब कथयेत्कथमीदृशस्य॥१८१॥

आर्य जयंधर। त्वयापि सकृदेवसकाशं गत्वा वक्तव्यश्च तत्रभवान्पाण्डुकुलबृहस्पतिर्माद्रेयः कनीयानस्माकम्। सकलकुरुकुलकमलाकरदावानलो युधिष्ठिरः परलोकमभिप्रस्थितः प्रियमनुजमनुकूलं सततमाशंसनीयमसंमूढं व्यसने ऽभ्युदये च धृतिमन्तं भवन्तमालिङ्ग्य शिरसि चाघ्रायेदं प्रार्थयते।



Digitized by Google

मम हि वयसा दूरेण त्वं श्रुतेन समो भवा-
न्कृतसकृतया बुद्ध्या ज्येष्ठो मनीषितया गुरुः।
शिरसि मुकुलौ पाणी कृत्वा भवन्तमतोऽर्थये
मयि विरलतां नेयः स्नेहः पितुर्भव वारिदः ॥१८२॥

अपि च। बाल्ये संवर्धितस्य नित्यमभिमानिनोऽस्मत्सदृशकृदयसार-स्यापि नकुलस्य ममाज्ञया वचने स्थातव्यम्। नानुगन्तव्यास्मत्पदवी त्वया हि वत्स।

विस्मृत्यास्मान्श्रुतविशदया स्वाग्रह्या चात्मबुद्ध्या
क्षीणे पाण्डावुदकपृषतानश्रुगर्भान्प्रदातुम्।
दायादानामपि तु भवने यादवानां कुले वा
कान्तारे वा कृतवसतिना रक्षणीयं शरीरम् ॥१८३॥

गच्छ जयंधर। अस्मच्छरीरस्पृष्टिकया शापितेन त्वयाकालक्षीनमिदमव-श्यमावेदनीयम्।

द्रौपदी। रुला बुड्ढिमदिए भणाहि मम वअणेण पिअसहिं। सु-भद्दं वच्छाए उत्तराए चउत्थो मासो पडिवण्णस्स गब्भस्स। तुमं एव्व कुलपडिट्ठाबअं सावकाणं रक्खेत्ति। कदा वि इदो लोअगदस्स ससुर-उलस्स अम्हाणं सलिलबिन्दुदो भविस्सदि त्ति।

युधिष्ठिरः। साक्षम्। भोः कष्टम्।

शाखारोधस्थगितवसुधामण्डले मण्डिताशे
पीनस्कन्धे सुसदृशमकामूलपर्यङ्कबन्धे।
दग्धे दैवात्सुमकृति तरौ तस्य सूक्ष्माङ्कुरे ऽस्मि-
न्नाशाबन्धं कमपि कुरुते छाययार्थी जनोऽयम् ॥१८४॥

द्रौपदि साधयेदानीमध्यवसितम्। कञ्चुकिनमवलोक्य। जयंधर। स्वशरीरेण

शापितो ऽसि। न तथा गम्यते।

कञ्चुकी। साक्रन्दम्। क्व देव पाण्डो। तव सुतानामज्ञातशत्रुभीमार्जुननकुलसहदेवानामयं दारुणः परिणामः। क्व देवि कुन्ति भोजराजभवनपताके।

भ्रातुस्ते तनयेन शौरिगुरुणा श्यालेन गाण्डीविन-
स्तस्यैवाखिलधार्तराष्ट्रनलिनीव्यालोलने दन्तिनः।
आचार्येण वृकोदरस्य कलिनामत्तेन मत्तेन वा
दग्धं वत्सुतकाननं तव मही यस्याश्रयाच्छीतला॥१८५॥

रुदन्निष्क्रान्तः।

युधिष्ठिरः। आर्य जयंधर जयंधर।

प्रविश्य

कञ्चुकी। आज्ञापयतु देवः।

युधिष्ठिरः। वक्तुमिच्छामि। न पुनरेतावन्ति भागधेयानि युष्माकम्। यदि कदाचिद्विजयी स्याद्वत्सो ऽर्जुनस्तद्वक्तव्यो ऽस्मद्वचनाद्भवता।

कली हेतुः सत्यं भवति मम वत्सस्य निधने
तथाप्येष भ्राता सकलसुहृदस्ते मधुरिपोः।
अतः क्रोधः कार्यो न खलु मयि च प्रेम भवता
वनं गच्छेर्मा गाः पुनरकरुणां क्षात्रपदवीम्॥१८६॥

कञ्चुकी। यदाज्ञापयति देवः। इति निष्क्रान्तः।

युधिष्ठिरः। सहर्षम्। ननूद्धतशिखाकलापाकृतास्मद्विधव्यसनिजनसमिद्धो भगवान्कृताशनस्तत्रेन्धनमात्मानं करिष्ये।

द्रौपदी। पसीददु महाराओ मम इमिणा अपच्छिमेण पणएण अहं एव्व अग्गदो गमिस्सामि।

Digitized by Google

युधिष्ठिरः। यद्येवं सहितावेवाभ्युदयमपि भोक्ष्यावहे।

चेटी। हा भअवन्तो लोअबाला परित्ताअह सोमवंसराएसिं। अअं क्खु राआ राअसूअसंदप्पिदद्धुदवहो खण्डवसंदप्पिदद्धुदवहस्स किरीडिणो जेट्ठो भादा सुगहिदणामहेओ महाराअजुहिट्ठिरो। एसा देवी पञ्चालराअकुलदेवदा वेदिमज्झसंभवा जण्णसेणी। दुवे बि सरीरेण णिक्कुणास्स कालाणलस्स इन्धणीहोन्ति। परित्ताअह परित्ताअह। तथोत्थायतः पतित्वा। किं ववसिदं देवीए देवेण अ।

युधिष्ठिरः। अयि बुद्धिमतिके। यन्नाथेन प्रियानुजेन विना सदृशं तत्। उत्तिष्ठ। उत्तिष्ठ सलिलमुपनय।

चेटी। जं देवो आणवेदि। इति निष्क्रम्य पुनः प्रविश्य। जेदु जेदु महाराओ।

युधिष्ठिरः। पाञ्चालि त्वमपि तावत्स्वपक्षपातिनो वृकोदरस्य प्रियस्यार्जुनस्योदकक्रियां कुरु।

द्रौपदी। महाराओ एवं करेदु अहं पुणो जलणं पविसिस्सं।

युधिष्ठिरः। अनतिक्रमणीयं लोकवृत्तम्। भद्रे। उदकमुपानय।

चेटी तथा करोति।

युधिष्ठिरः। पादौ प्रक्षाल्योपस्पृश्य च। एष च तावत्सलिलाञ्जलिर्गाङ्गेयाय भीष्माय गुरवे प्रपितामहाय शांतनवे पितामहाय विचित्रवीर्याय। साश्रु। तात तवाधुनावसरः। अयमपि तत्रभवते स्वर्गस्थाय गुरवे सुगृहीतनाम्ने पित्रे पाण्डवे।

अद्य प्रभृति वां दत्तमस्मत्तो दुर्लभं पुनः।
तात त्वयाम्बया सार्धमेतद्दत्तं निपीयताम् ॥ १८७ ॥

हा।

एतज्जलं जलजनीलविलोचनाय

भीमाय भोस्तव ममाप्यविभक्तमस्तु।
एकं क्षणं तु विषहस्व पिपासितो ऽसि
पातुं त्वया सह जवादयमागतो ऽस्मि ॥ १८८ ॥

अथवा सुक्षत्रियाणां गतिमुपगतं वत्समहमुपगतो ऽपि न कृती द्रष्टुम्। वत्स भीमसेन्।

मया पीतं पीतं तदनु भवताम्बास्तनयुगं
मदुच्छिष्टैर्वृत्तिं जनयसि रसैर्वत्सलतया।
वितानेष्वप्येवं तव च मम सोमे विधिरभू-
न्निवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना ॥ १८९ ॥

कृष्णे देहि जलाञ्जलिं तत्रभवते भीमाय।

द्रौपदी। हञ्जे बुद्धिमदिए देहि मे उदअं।

चेटी तथा करोति।

द्रौपदी। उपसृत्य जलाञ्जलिं पूरयित्वा। कस्स जलं देमि।

युधिष्ठिरः।

तस्मै देहि जलं पूर्णं सहसा गच्छते दिवम्।
अम्बापि येन गान्धार्या रुदितेन समीकृता ॥ १९० ॥

द्रौपदी। णाह परिजणोबणीदं सग्गगदस्स पादोदअं भविस्सदि एदं।

युधिष्ठिरः। फाल्गुनाग्रज।

असमाप्तप्रतिज्ञे ऽपि याते त्वयि ममानुजे।
मुक्तकेश्यैव ते दत्तः प्रियया सलिलाञ्जलिः ॥ १९१ ॥

द्रौपदी। उट्ठेहि महाराअ दूरं गच्छदि दे भादा।

युधिष्ठिरः। दक्षिणाक्षिस्पन्दनं सूचयित्वा। पाञ्चालि निमित्तानि मे कथयन्ति

संभावयसि वृकोदरमिति। भवतु शीघ्रं दर्शनमुपसर्पावः।

द्रौपदी। अ पज्जलिदो भअवं हुदवहो।

नेपथ्ये कलकलः।

प्रविश्य संभ्रान्तः

कञ्चुकी। परित्रायतां परित्रायतां महाराजः। एष खलु दुरात्मा कौरवापसदः स्नातस्नाभिषेकपाटलीकृताम्बरो रक्तभीषणगदाशनिरुद्धतकालदण्ड इवान्तको ऽत्रभवतीं पाञ्चालराजतनयामितस्ततः परिमार्गमाण इत एवाभिवर्तते।

युधिष्ठिरः। हा देव। ते निर्णयो ज्ञातः। हा गाण्डीवधन्वन्।

इति मुह्यति।

द्रौपदी। हा अज्जउत्त मम सअंवरसअंगाहकुडुम्बिअ धणंजअ। पिअं भादरं संभावेसि ण उण महाराअं इमं दासजणं अ। इति मूर्छति

राजा। हा असदृशमल्ल हा निवातकवचोद्धरणनिष्कण्टकीकृतामरलोक हा बदर्याश्रममुनिद्वितीयतापस हा द्रोणाचार्यप्रियशिष्य हा अस्त्रशिक्षाबलपरितोषितगाङ्गेय हा राधेयकुलकमलिनीप्रालेयवर्ष हा गन्धर्वनिर्वासितदुर्योधन हा पाण्डवकुलकमलिनीराजहंस।

तां वत्सलामनभिवन्द्य विनीतमम्बां
गाढं च मामनुपगूह्य मयाप्यनुक्तः।
एतां स्वयंवरवधूं सदृशीमदृष्ट्वा
दीर्घाध्वासमपि वत्स कथं गतो ऽसि॥ ११२॥

मोहमुपगतः।

कञ्चुकी। भोः कष्टम्। एष दुरात्मा सुयोधनो यथेष्टमित एवाभिवर्तते। सर्वथा संप्रत्ययमेव कालोचितः प्रतीकारः। भद्रे बुद्धिमतिके चितासमी-

Digitized by Google

पमुपनयात्रभवतीं पाञ्चालराजतनयाम्। भद्रे त्वमपि देव्या भ्रातरं धृष्टद्युम्नं नकुलसहदेवौ ब्रूहि। अथवा। एवमवस्थिते महाराजे ऽस्तमितयोर्भीमार्जुनयोः क्व नु परित्राणम्। नेपथ्ये। कलकलानन्तरम्। भोः समन्तपञ्चकसंचारिणः क्षतजास्वादमत्तयक्षराक्षसपिशाचभूतवेतालकङ्कगृध्रजम्बूकोलूकवायसभूयिष्ठावशिष्टविरलाश्च योधाः। कृतं मद्दर्शनत्रासेन। कथयत कस्मिन्नुद्देशे याज्ञसेनी संनिहिता। किं कथयाम्युपलक्षणं तस्याः।

ऊरुं करेण परिघृषतः सलीलं
दुर्योधनस्य पुरतो ऽपकृताम्बरा या।
दुःशासनस्य करकर्षणभिन्नमौलिः
सा द्रौपदी कथयत क्व पुनः प्रदेशे॥ ११३॥

कञ्चुकी। भो देवि याज्ञसेनि परिभूयसे संप्रत्यनाथा कुरुकुलकलङ्केन।

युधिष्ठिरः। सहसोत्थाय। पाञ्चालि न भेतव्यं न भेतव्यम्। उपनीयतां मे सज्जं धनुः। दुरात्मन्दुर्योधनकृतक। आगच्छ। अपनयामि ते गदाकौशलसंभूतं भुजदर्पं शिलीमुखासारेण। अन्यच्च। रे कुरुकुलाङ्गार।

प्रियमनुजमपश्यंस्तं जरासंधशत्रुं
कुपितकरकिरातद्वेषिणं तं च वत्सम्।
त्वमिव कठिनचेताः प्राणितुं नास्मि शक्तो
न तु पुनरपकर्तुं बाणवर्षैस्तवामून्॥ ११४॥

ततः प्रविशति गदापाणिः क्षतजासिक्तसर्वाङ्गो

भीमसेनः। उद्धतं परिक्रामन्। भो भोः समन्तपञ्चकसंचारिणः सैनिकाः। को ऽयमावेगः।

रक्तो नाहं न भूतं रिपुरुधिरजलप्लाविताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियो ऽस्मि।

Digitized by Google

भो भो राजन्यवीराः समरशिखिशिखादग्धशेषाः कृतं व-
स्त्रासेनानेन लोलैर्कृतकरितुरगात्तर्कितैरास्यते किम्॥ ११५॥

कञ्चुकी। देवि पाण्डुसुते। उत्तिष्ठोत्तिष्ठ। संप्रति कटितिचिताप्रवेश एव श्रेयान्।

द्रौपदी। सहसोत्थाय। कहं ण संभावेमि अज्ज वि चिदासमीवं।

युधिष्ठिरः। कः को ऽत्र भोः। सनिषङ्गं धनुरुपनय। कथं न कश्चित्परिजनः। भवतु बाहुयुद्धेनैव दुरात्मानमेव गाढमालिङ्ग्य ज्वलनमभिपातयामि। परिकरं बध्नाति।

कञ्चुकी। संयम्यत्तामिदानीं नयनोपरोधिनो दुःशासनावकृष्टा मुर्धजाः। अस्तमिता संप्रति प्रतीकाराशा। चितासमीपमेव द्रुततरं संभावय।

युधिष्ठिरः। न खल्वनिकृते तस्मिन्दुर्योधनकृतके संकर्तव्याः केशाः।

भीमसेनः। पाञ्चालि न खलु मयि जीवति संकर्तव्या दुःशासनविद्रुपिता वेणयात्मपाणिना।

द्रौपदी भयात्परिक्रामति।

भीमसेनः। तिष्ठ तिष्ठ भीरु क्वाधुना गम्यते। इति केशेषु ग्रहीतुमिच्छति।

युधिष्ठिरः। भीममालिङ्ग्य। दुरात्मन्भीमार्जुनशत्रो दुर्योधनकृतक।

आ शैशवादनुदिनं जनितापराधः
क्षीबो मदेन भुजयोर्कृतराजपुत्र।
आसाद्य मे ऽन्तरमिदं भुजपञ्जरस्य
जीवन्प्रयासि न पदात्पदमद्य पाप॥ ११६॥

भीमसेनः। अये कथमार्यः सुयोधनशङ्कया निर्दयं मामालिङ्गति। आर्य प्रसीद प्रसीद।

कञ्चुकी। निरूप्य सहर्षम्। महाराज वर्धसे। अयं खल्वायुष्मान्भीमसेनः सुयो-

Digitized by Google

धनक्षतजारुणितसकलशरीराम्बरो दुर्लक्ष्यव्यक्तिः। अलमधुना संदेहेन।

चेटी। द्रौपदीमालिङ्ग्य। देवि पूरिदपडिण्णाभारो णाहो देवीए वेणीसंहारं काडुं तुमं अणुसदि।

द्रौपदी। कञ्चुके किं मं अलीअवअणेहिं आसासेसि।

कञ्चुकी। महाराज न वञ्च्यसे। इति पूर्वोक्तमेवाभिधत्ते।

युधिष्ठिरः। जयंधर। अपि सत्यं नायमनुजवैरी सुयोधनकृतकः।

भीमसेनः। आर्य। देव। अजातशत्रो। भीमार्जुनगुरो। कुतो ऽद्यापि सुयोधनकृतकः। मया हि तस्य दुरात्मनः पाण्डुकुलपरिभाविनो

भूमौ क्षिप्तं शरीरं निहितमिदमसृक्क्रन्दनं भीमगात्रे
लक्ष्मीरार्ये निषण्णा चतुरुदधिपयः सीमया सार्धमुर्व्या।
भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ
नामैकं यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम्॥ ११७॥

युधिष्ठिरः स्वैरं मुक्त्वा भीममवलोकयन्नश्रूणि प्रमार्जयति।

भीमसेनः। पादयोः पतित्वा। जयत्वार्यः।

युधिष्ठिरः। वत्स बाष्पजलान्तरितनयनत्वान्न पश्यामि ते मुखचन्द्रम्। तत्कथय कच्चिज्जीवति भवान्समं किरीटिना।

भीमसेनः। निकृतसकलरिपुपक्षे त्वयि नराधिपे जीवति भीमो ऽर्जुनश्च।

युधिष्ठिरः। पुनर्गाढमालिङ्ग्य।

रिपोरास्तां तावन्निधनमिदमाख्याहि शतशः
प्रियो भ्राता भीमो मम भवसि यो ऽसौ बकरिपुः।

भीमसेनः। आर्य सो ऽहम्।

युधिष्ठिरः।



Digitized by Google

जरासंधस्योरःसरसि रुधिरासारसलिले
तटाघातक्रीडाललितमकरः संयति भवान् ॥ ११८ ॥

भीमसेनः। आर्य मुञ्चतु मां क्षणमेकं भवान्।

युधिष्ठिरः। किमपरमवशिष्टम्।

भीमसेनः। आर्य सुमरुद्वशिष्टम्। संयच्छामि तावदनेन दुर्योधन-दुःशासनरुधिरोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशकस्तम्।

राजा। सत्वरं गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम्।

भीमसेनः। भवति पाञ्चालराजतनये दिष्ट्या वर्धसे रिपुकुलक्षयेण।

द्रौपदी। उपसृत्य। जेदु जेदु णाहो। इति भयादपसर्पति।

भीमसेनः। राजपुत्रि। अलमेवं मामालोक्य त्रासेन। पश्य।

येनाकृष्टासि राज्ञां सदसि नृपशुना तेन दुःशासनेन
स्त्यानान्येतानि तस्य स्पृश मम करयोः पीतशेषाण्यसृञ्जि।
कान्ते राज्ञः कुरूणामपि रुधिरमिदं मद्गदाचूर्णितोरो-
रङ्गेष्वङ्गेषु सक्तं तव परिभवजस्यानलस्योपशान्त्यै ॥ ११९ ॥

बुद्धिमतिके। क्व संप्रति भानुमती योपहसति पाण्डवदारान्। भवति वेदिसंभवे याज्ञसेनि।

द्रौपदी। आणवेदु णाहो।

भीमसेनः। स्मरति भवती यन्मयोक्तम।

द्रौपदी। णाह सुमरामि अणुहवामि अ। चक्षुरुन्मीलयति पूर्वोक्तमेव पठति।

भीमसेनः। देवि भवति संयम्यतामिदानीं धार्तराष्ट्रकुलकालरात्रिर्दुःशासनविलुलिता वेणी।

Digitized by Google

द्रौपदी। णाह विसुमरिदम्हि एदं वाबारं णाहस्स पसाएण पुणो वि सिक्खिस्सं।

चेटी वेणीं बध्नाति।

नेपथ्ये।

क्रोधान्धैर्यस्य मोक्षात्कुरुनरपतिभिः पाण्डुपुत्रैः कृतानि
प्रत्याशं मुक्तकेशान्यतुलभुजबलैः पार्थिवान्तःपुराणि।
कृष्णायाः केशपाशः कुपितयमसखो धूमकेतुः कुलानां
सो ऽयं बद्धः प्रजानां विरमतु निधनं स्वस्ति राज्ञां कुलेभ्यः॥२००॥

युधिष्ठिरः। देवि। एष ते वेणीसंहारो ऽभिनन्द्यते नभस्तलसंचारिणा सिद्धजनेन।

ततः प्रविशतो वासुदेवार्जुनौ।

उभावुपगम्य।

कृष्णः। विजयतां निरुतसकलारातिमण्डलः सानुजः पाण्डवकुलचन्द्रमा महाराजो युधिष्ठिरः।

अर्जुनः। जयत्वार्यः।

युधिष्ठिरः। विलोक्य। अये भगवान्पुण्डरीकाक्षो वत्सश्च किरीटी। भगवन्किमुत मे विजयादन्यच्चास्य भगवान्पुराणपुरुषो नारायणो मङ्गलान्याशास्ते।

कृतगुरुमरुदादिक्षोभसंभूतमूर्तिं
गुणिनमुदयनाशस्थानहेतुं प्रजानाम्।
अजममरमचिन्त्यं चिन्तयित्वा भवन्तं
भवति जगदुद्वेगं किं पुनर्देव दृष्ट्वा॥२०१॥

अर्जुनमालिङ्ग्य। वत्स परिष्वजस्व माम्।

Digitized by Google

कृष्णः । एते खलु भगवन्तो व्यासवाल्मीकिनारदगन्यज्ञबालिप्रभृतयो महर्षयः कल्पितभिषेकमङ्गला नकुलसहदेवसात्यकिप्रमुखाश्च सेनापतयो यादवमत्स्यमागधकुलसंभवाश्च राजकुमाराः स्कन्धोत्तम्भिततीर्थवारिकलशास्त्वाभिषेकं धारयन्ति । अहमपि चार्वाकेण विप्रकृतं भवन्तमुपलभ्यार्जुनेन सह सत्वरमागतः ।

युधिष्ठिरः । किं नाम चार्वाकेण विप्रलब्धा वयम् । सरोषम् । क्वासौ धार्तराष्ट्रसखः पुण्यजनापसदो येन मे महाँश्चित्तविभ्रमः कृतः ।

कृष्णः । निगृहीतः स दुरात्मा नकुलेन । तत्कथय महाराज किमस्मात्परं समीहितम् ।

युधिष्ठिरः । एवं पुण्डरीकाक्ष न किंचिन्न ददाति भगवान्प्रसन्नः । अहं पुरुषसाधारणया बुद्ध्या संतुष्ये न खल्वतः परमभ्यर्थयितुं क्षमः । पश्यतु देवः ।

क्रोधान्धैः सकलं कृतं रिपुकुलं पश्चान्नतास्ते वयं
पाश्चात्या मम दुर्नये पतितया तीर्णो निकारार्णवः ।
त्वं देवः पुरुषोत्तमः सुकृतिनं मामादृतो भाषसे
किं नामान्यदतः परं भगवतो याचे प्रसन्नादहम् ॥ २०२ ॥

तथापि प्रीतश्चेद्भगवाँस्तदिदमस्तु भरतवाक्यम् ।

अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषं
भवतु च भवद्भक्तिर्द्वैधं विना पुरुषोत्तम ।
दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवि-
त्सततसुकृती भूयाद्भूपः प्रसाधितमण्डलः ॥ २०३ ॥

कृष्णः । एवमस्तु ।

इति निष्क्रान्ताः सर्वे ।

Digitized by Google

॥ इति षष्ठो ऽङ्कः ॥

॥ श्रीमृगराजलब्धभट्टनारायणविरचितं
वेणीसंहारं नाम नाटकं
समाप्तम् ॥

Digitized by Google

Digitized by Google

अथ

प्राकृतभाषाव्याख्या ।

Digitized by Google

Digitized by Google

॥ पत्रं ९ ॥

12. नेपथ्ये । समाश्वसितु समाश्वसितु भट्टिनी ।

19. 20. चेटी । देवि समाश्वसितु समाश्वसितु भट्टिनी । अपनेष्यति ते मन्युं नित्यानुबद्धकुरुवैरः कुमारभीमसेनः ।

21. द्रौपदी । कन्ये भवत्येतद्यदि महाराजस्य प्रतिकूलो भविष्यति ।

22. चेटी । एष कुमारस्तिष्ठति तदेनमुपसर्पतु भट्टिनी ।

23. द्रौपदी । कन्य एवं कुर्वः ।

॥ पत्रं १० ॥

1. चेटी । जयतु जयतु कुमारः ।

3. चेटी । परिकुपित इव कुमारो लक्ष्यते ।

4. 5. द्रौपदी । कन्ये यथेवं तद्वधीरणाप्येषा मामाश्वासयति । तदुपविष्टा भूत्वा शृणोमि तावन्नाथस्य व्यवसितम् ।

11. 12. द्रौपदी । नाथ । अश्रुतपूर्वमीदृशं वचनं तत्पुनरपि भण ।

॥ पत्रं ११ ॥

9. द्रौपदी । नाथ न लक्षन्त एते त्वमपि तावन्मा विस्मर ।

15. द्रौपदी । नाथ । उदासीनेषु युष्मासु मन्युर्न पुनः कुपितेषु ।

18. द्रौपदी । नाथ किमप्युद्वेगकारणं युष्मासु संनिहितेषु ।

22. 23. द्रौपदी । कन्ये बुठिमतिके निवेदय तावन्नाथस्य को ऽन्यो मम परिभवेण क्षियते ।

॥ पत्रं १२ ॥

1. चेटी । इतो ऽप्यधिकमय मन्युकारणमासीद्देव्याः ।

5. 6. चेटी । शृणोतु कुमारः । अय देव्यम्बासहिता सुभद्राप्रमुखेण सपत्नीवर्गेण परिवृतार्यगान्धार्याः पादवन्दनं कर्तु गतासीत् ।

8. चेटी । ततः प्रतिनिवर्तमाना भानुमत्या दृष्टा ।

10. 11. चेटी । ततस्तया देवीं प्रेक्ष्य सखीवदनदत्तदृष्ट्या सगर्वमीषद्विहस्य भणितम् ।

13. 14. चेटी । अयि याज्ञसेनि । पञ्च ग्रामाः प्रार्थ्यन्त इति श्रूयते । कस्मादिदानीमपि ते केशा न संयम्यन्ते ।



Digitized by Google

20. चेटी। कुमार यदि परिज्ञानहीना भवेन्ततो देवी भणाति।

22. 23. चेटी। कुमार मयैवं भणितम्। अयि भानुमति युष्माकममुकेषु केशेषु कथमस्माकं देव्याः केशाः संयम्यन्त इति।

॥ पत्रं १३ ॥

8. 9. द्रौपदी। किं नाथ दुष्करं त्वयि परिकुपिते ऽनुगृह्णन्त्वेतदूयवसितं ते भ्रातरः।

॥ पत्रं १५ ॥

3. 4. द्रौपदी। नाथ क्रुद्धानीमेष प्रलयज्वलधूमघनकुपितमांसलः क्षणे क्षणे समरदुन्दुभिस्ताड्यते।

6. द्रौपदी। क एष यज्ञः।

16. 17. द्रौपदी। नाथ। असुरसमराभिमुखस्य हरेरिव मङ्गलं युष्माकं भवतु।

18. 19. चेटी। अन्यच्च देवी भणाति। नाथ युष्माभिः पुनरपि समरादागत्याहमाश्वासयितव्या।

23. द्रौपदी। नाथ मा खलु मा खलु यात्तसेनीपरिभवोद्दीपितकोपानला

॥ पत्रं १६ ॥

1. 2. अनवेक्षितशरीराः संचरिष्यथ यतो ऽप्रमत्तसंचरणीयानि रिपुबलानि भूयन्ते।

॥ पत्रं १८ ॥

13—15. सखी। सखि भानुमति कस्मादिदानीं त्वं स्वप्नकदर्शनमात्रस्य कृते ऽभिमानिनो महाराजदुर्योधनस्य महिषी भूत्वैवं विगलितधीरभावातिमात्रं संतप्यसे।

16. चेटी। भट्टिदारिके शोभनं भणाति सुवदना।

17. भानुमती। एवं न्वेतत्

18. चेटी। स्वप्नयन्तनः किं न खलु किमपि न प्रलपति।

19. 20. भानुमती। कन्य एवं न्वेतत्। किं पुनरिदं मे ऽकुशलदर्शनं प्रतिभाति स्वप्नकम्।

21. सखी। प्रियसखि यद्येवं तत्कथय स्वप्नकं यद्वयमपि प्रतिश्रा-

॥ पत्रं १९ ॥

1. 2. वयन्त्यो धर्मप्रशंसया देवतासंकीर्तनेन दूर्वादिपरिग्रहेण च परिहरिष्यामः।

3. 4. चेटी। शोभनं खलु भणाति सुवदना। अकुशलदर्शनानि स्वप्नकानि देवतानां प्रशंसया कुशलपरिणामानि भवन्तीति श्रूयते।

5. भानुमती। यद्येवं तत्कथयिष्ये। अवहिता तावत्त्व।

6. सखी। अवहितास्मि कथयतु प्रियसखी।

7. 8. भानुमती। अथ किल मे प्रमद्वन आसोनायाः केनाप्यतिप्रायितदिव्यरूपेण नकुलेनाहिश्चातं व्यापादितम्।

9. सखी। श्चान्तं पापं श्चान्तं पापं प्रतिहतममङ्गलम्। देवि ततस्ततः।

10. भानुमती। हला भयेन विस्मृतास्मि तत्रिष्ठ यावत्सर्वं स्मृत्वा कथयिष्ये।

॥ पत्रं २१ ॥

9. सखी। प्रियसखि। अपि स्मृतं त्वया।

10. 11. भानुमती। सखि स्मृतम्। अथ किल प्रमद्वन आसीनाया ममाग्रतः केनाप्यतिश्रायितदिव्यरूपेण नकुलेनाहिश्चातं व्यापादितम्।

Digitized by Google

12. उभे। ग्लानं पापं ग्लान्तं पापम्। ततस्ततः।

13. भानुमती। संतापावगृहीतहृदयया पुनरपि मया विस्मृतम्।

17. सखी। अलं संतापेन कथयतु प्रियसखी।

॥ पत्रं २२ ॥

6. 7. भानुमती। हला हन्त ततस्तस्यातिप्रथितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका ज्ञाता।

19. सखी। ततस्ततः।

20. 21. भानुमती। ततो ऽहं त्वरितमासनस्थानमेतं लतामण्डपं प्रविष्टा। ततः स मामनुसरन्नेव लतामण्डपं प्रविष्टः।

॥ पत्रं २३ ॥

4. उभे। ततस्ततः।

5. भानुमती। ततस्तेन सगर्वप्रसारितकरेणापहृतं मे स्तनांशुकम्।

10. उभे। ततस्ततः।

11. 12. भानुमती। हला ततो ऽहमार्यपुत्रस्य प्रभातमङ्गलतूर्यरवमिश्रेण वारविलासिनीसंगीतशब्देन प्रतिबोधितास्मि।

16. 17. 18. सुवदना। यत्किमप्यत्याहितं तत्रागीरथीप्रमुखाणां नदीनां सलिलेनापह्रियतां भगवतां ब्राह्मणानामप्यग्निषाहुतिहुतेन प्रज्वलितेन भगवता हुताशनेन दह्यताम्।

॥ पत्रं २४ ॥

2. भानुमती। हला कथय किमत्र शुभसूचकम्।

4—9. सखी। अत्र नास्ति स्तोकमपि शुभसूचकम्। यथात्रालीकं कथयिष्ये ऽपराधिनी भविष्यामि। स इदानीं स्निग्धो जनो यः पृष्टः परुषमपि हितं भणति। सखि सर्वमेवैतदशुभनिवेदनं तदूदेवतानां प्रणामेन दूर्वादिपरिग्रहेण चान्तर्यताम्। न खलु दंष्ट्रिणो नकुलस्यान्यस्य वा दर्शनमहिंसातवधमपि स्वप्नके प्रशंसन्ति विचक्षणाः।

20. 21. भानुमती। हला सुवदने। उदयगिरिशिखरान्तरितविमुक्तरथवरो विगलितसंध्यारागप्रसन्नदुरालोकमण्डलो ज्ञातो भगवान्दिवसनाथः।

22. 23. चेटी। भट्टिनि रोषान्वितकनककान्तिसश्रीयेण लताजालान्तरोपहितकिरणजालेन पिञ्जरितोद्यानभूमिभागः पूरितप्रतिज्ञ इव रिपुर्दुष्प्रे-

॥ पत्रं २५ ॥

1. 2. ज्ञपीयो भगवन्सहस्ररश्मिः संवृत्तः। तत्समयस्ते लोहितचन्दनकुसुमगर्भेणार्घेण पर्यवस्थातुम्।

3. 4. भानुमती। हला तरलिके। उपनय मे ऽर्घभाजनं यावद्भगवतः सहस्रकिरणस्य सपर्यां निर्वर्तयामि।

5. 6. चेटी। यद्देव्याज्ञापयति। भट्टिनि। इदमर्घभाजनं निर्वर्तयतु भगवतः सहस्ररश्मेः सपर्याम्।

8. 9. सखी। कथं महाराज आगतो हन्त ज्ञातो ऽस्या नियमभङ्गः।

10—14. भानुमती। भगवन्नम्बरमहासर एकसहस्रपत्र पूर्वदिग्भावधूमुखमण्डनकुङ्कुमविशेषक सकलभुवनैकरत्नप्रदीप यत्र स्वप्नकदर्शने किमप्यत्याहितं तद्भगवतः प्रणामेन सभ्रातृकस्यार्यपुत्रस्य कुशलपरिणामीभवतु। कन्ये तरलिके। उपनय मे कुसुमान्यपरासामपि देवतानां सपर्यां निर्वर्तयितुम्।

Digitized by Google

16. भानुमती। अहो प्रमादः परिजनस्य।

॥ पत्रं २६ ॥

1. 2. भानुमती। अभ्यनुज्ञानातु मां महाराजः। अस्ति मे कस्मिन्नपि नियमे ऽभिलाषः।

5. 6. भानुमती। आर्यपुत्र। अतिमात्रं मे प्राङ्गा बाधते तदनुमन्यतां मामार्यपुत्रः।

12. 13. भानुमती। आर्यपुत्र न खलु किमपि मे प्राङ्गाकारणं युष्मासु संनिहितेषु किं त्वार्यपुत्रस्यैवं मनोरथसंपत्तिमभिनन्दामि।

21. भानुमती। परित्रायतां परित्रायतामार्यपुत्रः।

॥ पत्रं २७ ॥

4—7. सखी। महाराजः प्रविशत्वेतद्वृक्षपर्वतप्रासादम्। उच्छेदकारी खल्वयमुत्थितपरुषरजःकलुषीकृतनयनो विदलिततरुवरशब्दत्रिवस्तमन्दुरापरिभ्रष्टवल्गभतुरंगमः पर्याकुलीकृतजनपदतिर्भीषणाः समीरणासारः।

॥ पत्रं २८ ॥

1. भानुमती। दिष्ट्योत्पातसमीरणासारो न बाधते।

2. 3. सखी। महाराज। आरोहणसंभ्रमनिःसहं प्रियसख्या ऊरुयुगलं तत्कस्मादिदानीं महाराज आसनवेदीं नानुभूषयति।

21. भानुमती। आर्य किमनर्थं मन्त्रयसे।

॥ पत्रं २९ ॥

6. 7. भानुमती। आर्यपुत्र परिहार्यतामेतन्निमित्तं प्रसन्नब्राह्मणावेदानुघोषेण होमेन च।

11. 12. प्रतिहारी। जयतु जयतु महाराजः। महाराज। एषा खलु जामातुः सिन्धुराजस्य माता वधूर्दुःशला च प्रतिहारभूम्यां तिष्ठति।

16. प्रतिहारी। यन्महाराज आज्ञापयति।

18. माता। परित्रायतां कुरुनाथः।

21. माता। जात कुतः कुशलम्।

23. माता। अय खलु पुत्रवधामर्षादूदीपितेन गाण्डीवितानस्त-

॥ पत्रं ३० ॥

1. मिते दिवसनाथे तस्य वधः प्रतिज्ञातः।

7. 8. माता। जात यतश्च बन्धुवधामर्षादूदीपितकोपानला अनवेक्षितशरीरा वीराः परिक्रामन्ति।

15. माता। असमाप्तप्रतिज्ञाभरस्यात्मवधो ऽस्य प्रतिज्ञातः।

॥ पत्रं ३१ ॥

2. 3. भानुमती। आर्यपुत्र यद्यप्येवं तथापि गुरुकृतप्रतिज्ञाभरो धनंजयो निदानं खलु प्राङ्गायाः।

4. माता। जाते साधु कालोचितं त्वया मन्त्रितम्।

॥ पत्रं ३२ ॥

3. 4. हतमानुषमांसभोजनं कुम्भसहस्रवसाभिः संचितम्।
अनिशं च पिबामि शोणितं वर्षशतं समरो भविष्यति ॥

5—9. यदि सिन्धुराजवधदिवस इव समरकर्म प्रतिपद्यते ऽर्जुनस्ततश्च पर्यन्तभरितकोष्ठागारं मां-

सप्रोणितैर्मे गृहं भवति („भूयते")। अथ कु नु रुधिरप्रियो भवति („भूयते")। तथावदस्मिन्समरे प्रियभर्तारं रुधिरप्रियमन्विष्यामि। भवतु शब्दापयिष्यामि तावत्। रुधिरप्रिय रुधिरप्रिय। इत एहीत एहि।

11. 12. राक्षसः। प्रत्यग्रहतानां मांसकं वसृष्णां रुधिरं च लभते तदेष मम परिश्रमः क्षणमात्रमेव लघु नश्यति।

14. 15. राक्षसः। अरे क एष मां शब्दापयति। अरे कथं वसागन्धा। वसागन्धे मां किं शब्दापयसि।

16. राक्षसी। रुधिरप्रिय। एतत्खलु तव कारणात्प्रत्यग्रहतस्य कस्या-

॥ पत्रं ३४ ॥

1. 2. पि राज्ञर्षेः शरीरावयवप्रभूतं प्रभूतवसासृङ्मेदचिक्कणां कोष्णां रुधिरमग्रमांसं चानीतं तत्पिबैनत्।

3. 4. राक्षसः। साधु वसागन्धे साधु शोभनं कृतं त्वया बलीयो ऽस्मि पिपासित एतत्कोष्णं रुधिरमानीतम्।

5—7. राक्षसी। रुधिरप्रिय। ईदृशे हतनरगजतुरंगमशोणितवसासमुद्भवदुःसंचरे समराङ्गणे परिभ्रमन्तं पिपासितो ऽसीत्याश्चर्यमाश्चर्यम्।

8. 9. राक्षसः। अरे वसागन्धे। पुत्रघटोत्कचशोकसंतप्तहृदयां स्वामिनीं हिडिम्बादेवीं प्रेक्षितुं गतो ऽस्मि।

10. 11. राक्षसी। रुधिरप्रिय। अथापि स्वामिन्या हिडिम्बादेव्या घटोत्कचशोको नोपशाम्यति।

12. 13. राक्षसः। अयि कुतो ऽस्या उपशमः किं त्वभिमन्युवधशोकसमानदुःखया सुभद्रादेव्या याज्ञसेन्या च समाश्वास्यते।

14. 15. राक्षसी। रुधिरप्रिय गृहाण त्वमेतत्कपिञ्जलशिरःकपालसंचितमग्रमांसोपदंशं च पिब नवशोणितासवम्।

16. 17. राक्षसः। वसागन्धे। अथ कियत्प्रभूतं त्वया संचितं रुधिरमग्रमांसं च।

18—22. राक्षसी। अरे रुधिरप्रिय पूर्वसंचितं त्वमेव जानासि नवसंचितं शृणु। भगदत्तशोणितकुम्भः सिन्धुराजवसाकुम्भौ द्वौ मत्स्याधिपभूरिश्रवःसोमदत्तबाह्लीकप्रमुखाणां नरेन्द्राणां प्राकृतपुरुषाणां च रुधिरवसामांसस्य घटा अपिनटमुखाः सहस्रसंख्याः सन्ति मे गृहे।

23. राक्षसः। साधु साधु सुगृहिण्याः साधु साधु।

॥ पत्रं ३५ ॥

1. 2. अनेन ते सुगृहिणीत्वेन स्वामिन्या हिडिम्बादेव्याः संविभागेन च प्रनष्टं मे दारिद्र्यम्।

3. राक्षसी। रुधिरप्रय कीदृशः स्वामिन्या संविभागः कृतः।

4—9. राक्षसः। अथाहं स्वामिन्या हिडिम्बादेव्या सबहुमानं शब्दापयित्वाक्षप्तो यथा रुधिरप्रिय। अयप्रभृत्यार्यपुत्रभीमसेनस्य पृष्ठतो ऽनुपृष्ठं समरं आहिण्डितव्यमिति। तत्रस्यानुमार्गगामिनो हतमानुषशोणितनदीदुर्गानप्रनष्टबुभुक्षापिपासस्येहैव संगमस्तुमुलको मे भवति („भूयते")। त्वमपि विश्रब्धा भूत्वा रुधिरवसाभिः कुम्भसहस्रं संचय।

10. 11. राक्षसी। रुधिरप्रिय किं निमित्तं कुमारभीमसेनस्य पृष्ठतो ऽनुपृष्ठमाहिण्ड्यते।

12. 13. राक्षसः। वसागन्धे तेन स्वामिना वृकोदरेण दुःशासनस्य रुधिरं पातुं प्रतिज्ञातं तच्चास्माभी राक्षसैरनुप्रविश्य पातव्यमिति।

14. 15. राक्षसी। साधु स्वामिन्याः साधु। सुसंविधानो मे भर्ता त्वया कृतः।

17. 18. राक्षसी। अरे रुधिरप्रिय किं नु खल्वेष महान्कलकलः श्रूयते।

Digitized by Google

19. 20. राक्षसः । हला वसागन्धे । एष खलु धृष्टद्युम्नेन द्रोणाः केशेष्वाकृष्यासिपत्रेण व्यापाद्यते ।

21. 22. राक्षसी । रुधिरप्रिय रुधिरप्रिय वयमप्यागत्य द्रोणस्य रुधिरं पिबामः ।

23. राक्षसः । वसागन्धे ब्राह्मणाशोणितं खल्वेतदूलकं दहत्

॥ पत्रं ३६ ॥

1. प्रविशति तत्किमेतेन ।

3. राक्षसो । रुधिरप्रिय पुनरप्येष महान्कलकलः श्रूयते ।

4—6. राक्षसः । वसागन्धे । एष खल्वश्वत्थामाकृष्टासिपत्र इत एवागच्छति कदापि द्रुपदसुतरोषेणास्मानपि व्यापादयिष्यति । तदेहि स्वामिन्या हिडिम्बादेव्या श्राद्धपिण्डं कुर्मः ।

॥ पत्रं ५८ ॥

7—23. पुरुषः । आर्या अपि नामास्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युष्माभिर्महाराजदुर्योधनो न वेति । कथं न को ऽपि नन्त्रयते । भवत्वेतेषां बठपरिकराणां पुरुषाणां समूहो दृश्यत इत्यत्र गत्वा प्रक्ष्यामि । कथमेते स्वस्वामिनो गाढप्रहाराहतस्य धनसंनाहज्वालदुर्भेद्यमुखैः कङ्कपत्रैर्हृदयाच्छल्यान्युद्धरन्ति तत्खल्वेते न जानन्ति । भवत्वन्यतो विचेष्यामि । इमे खल्वपरे प्रभूततराः संकलिता वीरमानुषाः । अत्र गत्वा प्रक्ष्यामि । अहो जानीथ कस्मिन्नुद्देशे कुरुनाथो वर्तत इति । कथमेते ऽपि मां दृष्ट्वाधिकतरं रुदन्ति । तन्न खल्वेते ऽपि जानन्ति । हा दुष्करं खल्वत्र वर्तते । एषा वीरमाता समरविनिहतं पुत्रकं श्रुत्वा रक्तांशुकनिवसनया वध्वा सहानुम्रियते । साधु वीरमातः साधु । अन्यस्मिन्नपि ज्ञन्मान्तरे ऽनिहतपुत्रका भविष्यसि । भवत्वन्यतो विचेष्यामि । अयमपरो बहुप्रहारनिहतकायो ऽकृतव्रणप्रतीकार एव योधसमूहस्तिष्ठति । इमं प्रच्छामि तुरंगममुपालभ्य रोदिति । नूनमेतेषामत्रैव स्वामी व्यापादित इति । तन्न खल्वेते ऽपि जानन्ति । भवत्वन्यतो गत्वा प्रक्ष्यामि । कथं सर्व एवावस्थानुरूपं व्यसनमनुभवन्भागधेयविमुखतया पर्याकुलो जनः । तथाहि

॥ पत्रं ५९ ॥

1—13. अत्र प्रक्ष्यामि कं वोपालप्स्ये । भवतु स्वयमेवात्र विज्ञास्यामि । भवतु दैवमेवेदानीमुपालप्स्ये । अहो दैव । एकादशानामक्षौहिणीनां नाथो ज्येष्ठो भ्रातृशतस्य भर्ता गाङ्गेयद्रोणाङ्गराजशल्यकृपकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथिवीमण्डलैकनाथो महाराजदुर्योधनो ऽन्विष्यते न जाने कस्मिन्नुद्देशे स वर्तत इति । अथवा किमत्र दैवमुपालभे । तस्य खल्वेतन्निर्भर्त्सितविदुरवचनबीजस्य परिभूतपितामहहितोपदेशाङ्कुरस्य प्राक्तनिहतकप्रोत्साहनादिविवृद्धमूलस्य ज्ञतुगृहयूतविषशाखिनः संभूतचिरकालसंबद्धवैरालवालस्य पाञ्चालिकाकेशाग्रहणाकुसुमस्य फलं परिणमति । यथात्रैष विविधरत्नप्रभासंवलितसूर्यकिरणप्रसूतशक्रचापसहस्रसंपूरितदशदिशामुखो लूनकेतुवंशो रथो दृश्यते । तदहं तर्कयाम्यवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम् । जयतु जयतु महाराजः ।

16. सुन्दरकः । देव कुशलं शरीरमात्रेण ।

19. सुन्दरकः । देव न रथो भग्नो ऽस्य मनोरथो ऽपि ।

22. 23. सुन्दरकः । यद्देव आज्ञापयतीति । अये देवस्य मुकुटमणिप्रभावेणापनीता मे रणप्रहारवेदना । शृणोतु देवः । अस्ति

॥ पत्रं ६० ॥

1. इदानां कुमारदुःशासनवध ।

Digitized by Google

4—7. सुन्दरकः। शृणोतु देवः। अथ तावद् दुःशासनवधामर्षितेन स्वामिनाङ्गारेण कुटिलभृकुटिभङ्गभीषणाललाटपट्टेनाविज्ञातसंधानमोक्षेण शिलीमुखसंघातवर्षिणाभियुक्तः स दुराचारो मध्यमपाण्डवो भीमसेनहतकः।

9—11. सुन्दरकः। ततो देवोभयबलमिलद्धूलीप्यत्करितुरगपदातिसमुद्भूतधूलिनिवहेन पर्यस्ततन्नद्धघटासंघातेन च विस्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलं न भुवनतलं लक्ष्यते।

13. 14. सुन्दरकः। ततो देव दूराकृष्टधनुर्गुणाच्छोटनटंकारगम्भीरभीषणेनान्धकारेण ज्ञायते गर्जितं प्रलयजलधरेणेति।

16—19. सुन्दरकः। ततश्च द्वयोस्तयोरन्योन्यसिंहनादगर्जितपिशुनं विविधपरिमुक्तप्रहरणाहतकवचसंस्खलितस्खलनविगुक्तं रुधिरबिन्दुखद्योतभासुरं गम्भीरस्तनितचापजलधरप्रसृतशरधारासहस्रवर्षदुर्दर्शनं संभूतं समरदुर्दिनम्।

21—23. सुन्दरकः। ततश्च देवैतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः पराभवशङ्किना धनंजयेन वज्रनिर्घातनिर्घोषविषमरसितरथशिखरस्थितवानरस्तुरंगमसंवाहनव्याकुलवासुदेवप्रयुक्तचक्रगदासिलाञ्छितचतुर्लचतुर्बाहु—

॥ पत्रं ६१ ॥

1. 2. दर्पोद्दुर्दर्शन आपूरितपाञ्चजन्यदेवदत्तारसितप्रतिरवभरितदशदिशामुखकुहरो धावितस्तमुद्देशं रथवरः।

4—7. सुन्दरकः। ततो भीमसेनधनंजयाभ्यामभियुक्तं पितरं प्रेक्ष्य ससंभ्रमं विगलितमवधूय रत्नप्रतीर्षकमाकर्णाकृष्टकठिनकोदण्डो दक्षिणहस्तक्षिप्तशरपुङ्खबन्धनो विघट्टनत्वरितसारथिकस्तं देशमुपगतः कुमारवृषसेनः।

9—12. सुन्दरकः। ततश्च तेन देवागच्छतैव कुमारवृषसेनेन विदलितासितताम्रश्यामलस्निग्धपुङ्खैः कठिनकङ्कपत्रैः कृष्णावदनैः शिलानिशितश्यामलशल्यबन्धैः कुसुमित इव तरुर्मुहूर्तकेन शिलीमुखैः प्रच्छादितो धनंजयस्य रथवरः।

14—20. सुन्दरकः। ततो देव तीक्ष्णाविच्छिन्ननिशितभल्लवर्षिणा धनंजयेनेषद्विहस्य भणितम्। अरे रे वृषसेन पितुरपि तावन्न ते ममाभिमुखं स्थातुं युक्तमथ किं पुनर्भवतो बालस्य। तदच्छापरैः कुमारकैरायुधस्वेति। एवं च निशम्य गुरुतनाधिक्षेपेणोद्दीपितकोपोपक्रमुखमण्डलविजृम्भितभीमभृकुटिभङ्गभीषणेन चापधारिणा कुमारवृषसेनेनापि मर्मभेदकैः परुषविषमैः सुदिवसकृतप्रणयैर्निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनैः।

22. 23. सुन्दरकः। ततश्च देव शितशराभिघातवेदनोपजातमन्युमा गाण्डीविना चण्डगाण्डीवत्राशब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपत—

॥ पत्रं ६२ ॥

1. नप्रतिषिद्धदर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरूपं किमप्याश्चर्यम्।

3—5. सुन्दरकः। ततश्च देव तच्च प्रेक्ष्य तस्य पात्रोः समरव्यापारचतुरत्वमविभाविततूणीमुखधनुर्गुणागमनशरसंधानमोक्षचटुलकरतलेन कुमारवृषसेनेनापि सविशेषं प्रस्तुतं समरकर्म।

7—9. सुन्दरकः। ततश्च देव परिशेषितरणव्यापारो विमुक्तचिरनिबद्धवैरानुबन्धो द्वयोरपि कुरुराजपाण्डवबलयोः साधु वृषसेन साधुिति कलकलमुखरो वीरलोक आलोकयितुं प्रवृत्तः।

11—14. सुन्दरकः। ततश्च देवावधीरितसकलधानुष्कचक्रपराक्रमशालिनः सुतस्य तथाविधेन

समरकर्मारम्भेण हर्षरोमकूपाग्रङ्कासंकरे ऽनुवर्तमानस्य स्वामिनो ऽङ्गराजस्य निपतिता प्रारपठतिर्भीमसेने बाष्पाकुला दृष्टिः कुमारवृषसेने।

16—18. सुन्दरकः। ततश्च देवोभयबलप्रवृत्तसाधुकारामर्षितेन प्रारवर्षप्रज्वलितेन गाण्डीविना तुरगेषु सारथावपि रथवरे धनुष्यपि ज्यायामपि नरेन्द्रलाञ्छने सितातपत्रे व्यापारिताः समं शिलीमुखाः।

20. 21. सुन्दरकः। ततो देव विरथो लूनगुणाकोदण्डकः परिभमणामात्रव्यापारप्रतिषिद्धप्रारसंपातो मण्डलानि विरचयितुं प्रवृत्तः कुमारः।

23. सुन्दरकः। ततश्च देव सुतरथविध्वंसनामर्षोद्दीपितेन स्वामिना-

॥ पत्रं ६३ ॥

1—6. अङ्गराजेनागणितभीमसेनाभियोगेन प्रस्तुतो धनंजयस्योपरि शिलीमुखासारकः कुमारवृषसेनो ऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि संवृत्तो धनंजयाभियोगे। भणितं च कुमारेण। रे रे तातापित्तेपमुखर मध्यमपाण्डव मम प्रारास्तव प्रारीरमुज्झित्वान्यस्मिन् निपतन्तीति भणित्वा प्रारसहस्रैः पाण्डवप्रारीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः।

9—13. सुन्दरकः। ततश्च देव तस्य प्रारसहस्रसंपातमवधूय किरीटिना गृहीता रथोत्सङ्गात्कृपात्कनककिङ्किणीजालकंकारविराविणी मेघोपरोधविमुक्तनभस्तलनिर्मला निग्धितश्यामलस्निग्धमुखी विविधरत्नप्रभाभासुरभीषणारमणीयदर्शना प्रक्तिः सोपहासं विमुक्ता धनंजयेन कुमाराभिमुखम्।

15—18. सुन्दरकः। ततश्च देव प्रज्वलन्तीं प्रक्तिं प्रेक्ष्य विगलितमङ्गराजस्य हस्तात्सप्रारं धनुर्हृदयाद्वीरसुलभ उत्साहो नयनाद्बाष्पसलिलं वदनाद्भसितं हसितं च धनंजयेन सिंहनादं विनादितं वृकोदरेण च दुष्करं दुष्करमित्याक्रन्दितं कुरुबलेन।

20—22. सुन्दरकः। ततश्च देव कुमारवृषसेनेनाकर्णाकर्षितनिग्धितक्षुरप्रेषा सुचिरं निर्भर्त्स्यार्धपथ एव भागीरथीव भगवता विषमलोचनेन त्रिधाकृता प्रक्तिः।

॥ पत्रं ६४ ॥

1—3. सुन्दरकः। तत एतस्मिन्नन्तरे कृतकलकलमुखरेण वीरलोकसाधुवादेनान्तरितः समरतूर्यारवः सिद्धचारणगणविमुक्तेन कुसुमप्रकरेण प्रच्छादितं समराङ्गणम्।

5—9. सुन्दरकः। ततश्च देव भणितं स्वामिनाङ्गराजेन। भो वृकोदर। श्रमापनुस्तव ममापि समरव्यापारस्तदनुमन्यतां मां मुहूर्तकं प्रेक्षामहे तावद्वत्सस्य तव भ्रातुर्धनुर्वेदशिक्षानिपुणत्वं तवाप्येतत्प्रेक्षणीयमिति। ततो विरतौ रणव्यापारनिर्बन्धान्मुहूर्तकं प्रशमितवैरौ ज्ञातौ द्वावपि प्रेक्षकौ भीमसेनाङ्गराजौ।

11. 12. सुन्दरकः। ततश्च देवैतस्मिन्नन्तरे प्रक्तिक्षेपउनामर्षितेन गाण्डीविनैवं भणितम्। रे रे दुर्योधनप्रमुखाः।

14—18. सुन्दरकः। प्रूपोतु देवः। अरे दुर्योधनप्रमुखाः कुरुबलसेनाप्रभवः। रे ऽविनयनदीकर्णाधार कर्ण। युष्माभिर्मम परोक्षमेकाकी पुत्रको ऽभिमन्युर्व्यापादितो ऽहं पुनर्युष्माकं प्रेक्षमाणानामेतं कुमारवृषसेनं स्मर्तव्यप्रोषं करोमीति भणित्वा सगर्वमास्फालितमनेन निर्घातघोषनिर्णादरुद्यारवं गाण्डीवं स्वामिनापि सज्जीकृतं कालपृष्ठम्।

20—23. सुन्दरकः। ततश्चैतस्मिन्नन्तरे प्रतिषिद्धभीमसेनसमरकर्मारम्भेण गाण्डीविना विरचिते ऽङ्गराजवृषसेनरथकूलंकषे बाणनद्यौ। तत्रापि द्वाभ्यामन्योन्यस्नेहदर्शितशिक्षाविशेषाभ्यामभियुक्तो मध्यमपाण्डवः।

Digitized by Google

॥ पत्रं ६५ ॥

2—5. सुन्दरकः । ततश्च गाण्डीविना तारसितज्यानिर्घोषमात्रविज्ञातबाणावर्षेण तथारसितं पत्रिभिर्यथा न नभस्तलं न स्वामी न रथो न धरणी न कुमारो न केतुवंशो न बलानि न सारथिर्न तुरंगमो न दिशा न वीरलोकश्च संलक्ष्यते ।

7—9. सुन्दरकः । ततश्च देव क्षणमात्रमेवातिक्रान्ते प्रारब्धसंपाते सहर्षसिंहनादे पाण्डवसैन्ये विमुक्ताक्रन्दे कौरवबले समुत्थितो महान्कलकलो हा हतः कुमारो वृषसेन इति ।

11—13. सुन्दरकः । ततश्च देव प्रेक्षे कुमारं हतसारथितुरंगं लूनातपत्रचापचामरकेतुवंशं स्वर्गप्रभ्रष्टमिव सुरकुमारं हृदयमर्मभेदिनैकेन शिलीमुखेन भिन्नदेहं रथमध्ये पर्यस्तम् ।

॥ पत्रं ६६ ॥

7—10. सुन्दरकः । ततो देव तथाहतस्य पुत्रस्य दर्शनेन संगलितमश्रुजलमुद्धिकृत्वानपेक्षितपरप्रहरणेन स्वामिनाङ्गरक्षेणाभियुक्तो धनंजयः । ततस्तं च सुतवधामर्षितं विमुक्तजीविताशं तथा परिक्रामन्तं प्रेक्ष्य भीमनकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनंजयस्य रथः ।

12—16. सुन्दरकः । ततो ऽर्जुनचापमहाप्रलयपयोधरनिसृतशरधारासहस्रैः पूरितेषु दिशामुखेषु शल्येन भणितः स्वाम्यङ्गरक्षाः । यथाङ्गराज हततुरंगमो मथितचक्रनेमिकूबरस्ते रथस्तन्न युक्तं भीमार्जुनाभ्यामभियोक्तुमिति भणित्वा निवर्तितो रथो ऽवतारितः स्वामी स्यन्दनाद्बहुप्रकारं च समाश्वासितः ।

18—22. सुन्दरकः । ततश्च स्वामिना सुदूरं विलम्ब्य परिज्ञनो ऽभिहितो ऽन्यं रथं म उपनयति परिज्ञनोपनीतमन्यं रथं प्रेक्ष्य मयि दत्तदृष्टिः सुन्दरैहीति भणितं च । अहं चोपगतः समीपम् । ततो ऽपनीय शीर्षस्थानात्पटिकां शरीरसंगलितैः शोणितबिन्दुभिर्दिग्धवदनं बाणं कृत्वाभिलिखित एष देवस्य संदेशः ।

॥ पत्रं ६७ ॥

9—10. सुन्दरकः । देव । अपनीतशरीरावरणः आत्मवधकृतनिश्चयः स्वयमेव समरं मार्गति ।

21. सुन्दरकः । यदूदेव आज्ञापयति ।

॥ पत्रं ६९ ॥

4. गान्धारी । जात युज्यते सत्यं जीवति स तत्कस्मिन्कथय तमुद्देशम् ।

6. 7. गान्धारी । जात । एकाकीति भणसि किं नु खलु सांप्रतं तस्य भ्रातृकशतं पार्श्वे न भविष्यति ।

॥ पत्रं ७० ॥

2. 3. गान्धारी । वत्स । अतिगाढप्रहारवेदनापर्याकुलस्यास्मास्वपि न ते प्रसरति वाणी ।

5. 6. गान्धारी । वत्स यदि त्वमप्यस्मान्नालपसि किमिदानीं दुःशासन आलपिष्यति दुर्मर्षणो वान्यो वा ।

12. 13. गान्धारी । जात । अलं परिदेवितेन त्वमपि तावदेको ऽन्धयुगलस्य मार्गोपदेशकश्चिरं जीव । किं मे राज्येन वैरेण वा ।

॥ पत्रं ७१ ॥

6—8. गान्धारी । जात । एतदेवेदानीं प्रभूतं यत्त्वमपि तावदेको जीवसि कमन्यमनुशोचिष्यामि । तज्जाताकालस्ते समरस्य । प्रसीद । एष ते ऽञ्जलिर्निवर्त्यतां समरव्यापारात् । अपश्चिमं कुरु वचनम् ।

16. गान्धारी । यत्पिता ते विदुरो वा भणिष्यति तदनुतिष्ठ ।



Digitized by Google

॥ पत्रं ७२ ॥

19. गान्धारी। उपपत्तियुक्तं प्रतिपद्यस्व पितुर्वचनम्।

॥ पत्रं ७३ ॥

2. 3. गान्धारी। हा ज्ञात दुःशासन हा दुर्मर्षण हा विकर्ण हा वीरप्रतप्रसविनी गान्धारी दुःखप्रातं प्रसूता न सुतप्रातम्।

16. गान्धारी। संज्ञय हाहाकारमिश्रं तूर्यरसितं श्रूयते।

22. गान्धारी। ज्ञात मुहूर्तकं तावन्मन्दभागिनीं समाश्वासय।

॥ पत्रं ७४ ॥

5. गान्धारी। तज्ज्ञातैकाकी त्वं कस्ते सहायत्वं करिष्यति।

॥ पत्रं ७५ ॥

2. गान्धारी। ज्ञात समाश्वासिहि समाश्वासिहि।

॥ पत्रं ७६ ॥

4. गान्धारी। ज्ञात प्रिथिलय तावत्क्षणमात्रं बाष्पमोक्षम्।

॥ पत्रं ७७ ॥

1. गान्धारी। तेनैव सुतप्रातकृतान्तेन वृकोदरेण समं समरं मार्गसि।

13. गान्धारी। कतरः पुनः स यत्रैतां हताश्रामवलम्बिष्ये।

॥ पत्रं ७८ ॥

4. गान्धारी। ज्ञात किमत्र सांप्रतं प्रतिपत्तव्यम्।

6. गान्धारी। हा हतास्म्यहं मन्दभागिनी।

॥ पत्रं ८२ ॥

3. गान्धारी। ज्ञात प्रत्युद्गच्छैतं महाभागम्।

॥ पत्रं ८४ ॥

7. द्रौपदी। पाञ्चाल्येति किं न भणितम्।

॥ पत्रं ८५ ॥

20. द्रौपदी। कथं समरगोचरो वर्तते मे नाथः।

॥ पत्रं ८६ ॥

15. द्रौपदी। भद्र कथय कथय।

23. द्रौपदी। अग्रतः कथय।

॥ पत्रं ८८ ॥

5. 6. द्रौपदी। अपनीतो मे नाथ मन्युर्यदि पुनरपि सुलभं दर्शनं भविष्यति।

20. द्रौपदी। प्रतिपन्नः समरो न वा।

॥ पत्रं ९० ॥

2. 3. द्रौपदी। यदूदेवस्त्रिभुवननाथ आज्ञापयति तच्च कथमन्यथा भविष्यति।

॥ पत्रं ९१ ॥

2—5. द्रौपदी। महाराज किं निमित्तं पुनर्नाथभीमसेनेन स दुराचारो भणितः पञ्चानामप्यस्माकं

Digitized by Google

येन ते रोचते तेन सह संग्रामो भवत्विति। कथं नामैतयोर्मार्द्रीसुतयोरेकतरः प्रार्थितस्तेन संग्रामो भवेन्ततो ऽत्याहितं भवेत्।

॥ पत्रं १२ ॥

22. द्रौपदी। बुडिमतिके वीजय महर्षि तालवृन्तेन।

॥ पत्रं १३ ॥

16. चेटी। समाश्वसितु समाश्वसितु देवी।

18. द्रौपदी। भगवन्कथय किं वृत्तमिति।

20. द्रौपदी। हा नाथ भीम।

23. चेटी। समाश्वसितु देवी।

॥ पत्रं १४ ॥

11. द्रौपदी। ततस्ततः।

17—19. द्रौपदी। हा नाथ भीमसेन हा मम परिभवप्रतिकारपरित्यक्तजीवित क्षटासुरबकहिडिम्बकिर्मीरकीचकजरासंधनिषूदन नाथ सौगन्धिकाहरणाचाटुकार देहि मे प्रतिवचनम्।

॥ पत्रं १५ ॥

14. 15. द्रौपदी। हा नाथ भ्रातृवत्सल न युक्तं भ्रातरमप्रिक्षितं गदायां प्रान्तोर्मुखं गच्छन्तमुपेक्षितुम्।

॥ पत्रं १६ ॥

2. द्रौपदी। महाराज किमेतदवर्तते।

8. 9. द्रौपदी। नाथ स्वयं किल मे केशाः संयन्तव्याः। न युक्तं वीरस्य क्षत्रियस्य प्रतिज्ञातं ग्रिथिलयितुम्। तत्प्रतिपालय मां यावदुपसर्पामि।

॥ पत्रं १७ ॥

5—12. द्रौपदी। ब्रधातु नाथो दुर्योधनरुधिरोष्णेन हस्तेन दुःशासनमोचितं मे केशहस्तम्। कन्ये बुडिमतिके तव प्रत्यक्षमेव नाथेन प्रतिज्ञातम्। संदिष्टं मे तावदूदेवकीनन्दनेन केशारचनारभ्यतामिति तदुपनय मे फुल्लदामानि विरचयत तावत्कवरीं कुरुत भगवतः पुरुषोत्तमस्य वचनं न खलीकं मन्त्रयते सः। अथवा किं मयातिसंतप्तया भणितमटूरागतमार्यपुत्रमनुगमिष्यामि। महाराज। श्राद्दीपय मे चिताम्। त्वमपि क्षत्रधर्ममनुवर्तमान एव मम नाथस्य जीवितहरस्याभिमुखो भव।

॥ पत्रं १८ ॥

15—17. द्रौपदी। आर्य कुरुषु दारुसंचयम्। कथं न को ऽपि महाराजस्य वचनं करोति। हा नाथ। अथैष त्वया विना महाराजः परिजनेनापि परिभूयते।

॥ पत्रं १९ ॥

3. द्रौपदी। त्वरतां त्वरतां महाराजः।

5—7. द्रौपदी। महाराज। कस्याप्येष बहलदर्पितस्य निर्घोषः श्रूयते। अपरमप्यप्रियं श्रोतुमस्ति निर्बन्धस्ततो विलम्ब्यते।

11—13. द्रौपदी। एवं महाराजाम्बायै संदेक्ष्यामि। यः स बकहिडिम्बकिर्मीरकजरासंधत्रयमल्लो ऽपि मध्यमपुत्रो मम ते हताशायाः पक्षपातेन परलोकं गत इति।

Digitized by Google

॥ पत्रं १०० ॥

14—17. द्रौपदी। हला बुडिमतिके भणा मम वचनेन प्रियसखीं सुभद्राम्। वत्साया उत्तरायाश्चतुर्थो मासः प्रतिपन्नस्य गर्भस्य। त्वमेव कुलप्रतिष्ठापकं सावधानं रक्षेति। कदापीतो लोकगतस्य पाण्डुरकुलस्यास्माकं सलिलबिन्दुदो भविष्यतीति।

॥ पत्रं १०१ ॥

22. 23. द्रौपदी। प्रसीदतु महाराजो ममानेनापश्चिमेन प्रणामेनाहमेवाग्रतो गमिष्यामि।

॥ पत्रं १०२ ॥

2—7. चेटी। हा भगवन्तो लोकपालाः परित्रायध्वं सोमवंशराजर्षिम्। अयं खलु राजा राजसूयसंतर्पितहुतवहः खाण्डवसंतर्पितहुतवहस्य किरीटिनो ज्येष्ठो भ्राता सुगृहीतनामधेयो महाराजयुधिष्ठिरः। एषा देवी पाञ्चालराजकुलदेवता वेदिमध्यसंभवा याज्ञसेनी। द्वावपि शरीरेण निष्करुणस्य कालानलस्येन्धनीभवतः। परित्रायध्वं परित्रायध्वम्। किं व्यवसितं देव्या देवेन च।

10. चेटी। यद्देव आज्ञापयति। जयतु जयतु महाराजः।

13. द्रौपदी। महाराज एवं करोत्वहं पुनर्ज्वलनं प्रवेक्ष्यामि।

॥ पत्रं १०३ ॥

13. द्रौपदी। कन्ये बुडिमतिके देहि म उदकम्।

15. द्रौपदी। कस्मै जलं ददानि।

19. 20. द्रौपदी। नाथ परिजनोपनीतं स्वर्गगतस्य पादोदकं भविष्यत्येतत्।

22. द्रौपदी। उत्तिष्ठ महाराज दूरं गच्छति ते भ्राता।

॥ पत्रं १०४ ॥

2. द्रौपदी। आः प्रज्वलितो भगवान्हुतवहः।

11. 12. द्रौपदी। हा आर्यपुत्र मम स्वयंवरस्वयंग्राहकुटुम्बिक धनंजय। प्रियं भ्रातरं संभावयसि न पुनर्महाराजमिमं दासजनं च।

॥ पत्रं १०६ ॥

5. द्रौपदी। कथं न संभावयाम्यथापि चितासमीपम्।

॥ पत्रं १०७ ॥

2. 3. चेटी। देवि पूरितप्रतिज्ञाभारो नाथो देव्या वेणीसंहारं कर्तुं त्वामन्विष्यति।

4. द्रौपदी। कन्ये किं मामलीकवचनैराश्वासयसि।

॥ पत्रं १०८ ॥

11. द्रौपदी। जयतु जयतु नाथः।

19. द्रौपदी। आज्ञापयतु नाथः।

21. द्रौपदी। नाथ स्मराम्यनुभवामि च।

॥ पत्रं १०९ ॥

1. 2. द्रौपदी। नाथ विस्मृतास्म्येतं व्यापारं नाथस्य प्रसादेन पुनरपि शिक्षिष्ये।

॥ इति प्राकृतभाषाव्याख्या समाप्ता ॥

Digitized by Google

# Kritische Noten.

Digitized by Google

Digitized by Google

3. 11. BCD$\beta\gamma$T संभ्रमाच्चासु 13. $\alpha\beta\gamma$ (Jag.) आकृष्यास्यं CD आकृष्टः (D आदृष्टः) श्रीघ्रमुच्चैः श्रमितनिजवधू 14. Vers 1—3 fehlen in B; dagegen hat B mit den andern Devanâgarî-Handschriften eine in $\alpha\beta\gamma$ (Jag.) fehlende Nândî, die in ACDELP mit der Formel पाठान्तरे नान्दी। an die erste angefügt wird und so lautet:

जयति स नाभिर्नगतां स्वनाभिरन्ध्रोद्भवज्जगद्बीजः।
दामोदरो निजोदरगह्वरनिक्षिप्तजगदण्डः ॥ १

अपि च।

जयति स भगवान्कृष्णः शेते यः शेषभोगशय्यायाम्।
मध्येपयः पयोधेरपर इवाम्भोनिधिः कृष्णः ॥ २

अपि च।

उन्निद्धन्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्याः।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रोतिना शौरिणा वः
प्राय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥ ३

In Vers 1. b. liest T (der diese zweite Nândî gleichfalls vom Text ausgeschlossen hat) statt निक्षिप्त निविष्ट; in Vers 3, b. B statt विगलित प्रस्रंसित.

4. 2. अलमतिप्रसङ्गेन fehlt in $\alpha\beta\gamma$T. 4. $\beta$ (nach der Lesung Lenz's) und Jag. T रागमकृष्णं. Vers 4. ist in B und $\alpha\gamma$ zur Nândî gerechnet; नान्यन्ते सूत्रधारः। अल folgt daher hier auf Vers 4.—5. $\beta$ अलमतिविस्तरेण। तत्रभवतः परिषद्ग्रे विज्ञापयामि। $\alpha$ (अलमति° fehlt) समन्ताद्वलोक्य। तद्त्रपरिषद्ग्रेसरान्विज्ञापयामि। $\gamma$ अलमतिविस्तरेण। समन्ताद्वलोक्य। तत्रभवतः परिषद्ग्रेसरान्विज्ञाप्य. T wie $\gamma$, aber statt विज्ञाप्य सर्वान्विज्ञापयामि।, ausserdem die Lesart: अत्रैव अलमतिप्रसङ्गेन भवन्तः परिषद्ग्रेसरा विज्ञाप्यं नः किंचिदस्ति। BCD तत्रभवतः (in B aus einem ursprünglichen तत्रभवंतः fehlerhaft corrigirt; in CD durch spätere Hand in तद्भवन्तः abgeändert). Jag. liest तत्रभवन्तः परिषद्ग्रेसरान्विज्ञाप्य। (!). 8. B$\alpha\beta$T यदिदं; AC कृतिर्वेणो B कृतिमभिनवं वेणो D कृतिरभिनवं वेणो $\beta$ कृतिरभिनववेणो $\gamma$ कृतमभिनववेणो $\alpha$ कृतिमभिनवां वेणो P कृतिः वेणो (!) T अभिनवकृतिं; T वेणीसंहारनामकं. 9. $\alpha$ तद्त्रपरिषन्मुख्यैः कविः प्रणयक्रेशानुरोधान्नवनाटककुतूहलदर्शनादुदात्तकथाप्रवणगोरवाच्च भवद्भि $\gamma$ तत्रपरिषन्मुख्यैः कवि T तत्र च कवि; रोधादुदात्त so nur BE$\gamma$, die andern ausser $\beta$: रोधाद्वा

Digitized by Google

उदान्न, $\beta$ रोधान्नवनाटकदर्शनकुतूहलादुदान्न, $\gamma$ गोरवान्नाटकदर्शनकुतूहलाच्च. 10. beng. अभ्यर्थयामहे. 11. $\beta$ त्वरतां 12. $\alpha$ सर्वमेव fehlt $\gamma$T सकलमेव CD$\beta$ सर्व एव; $\beta$ प्रवर्त्यन्तामपरिहीयमनातोयमङ्गलविन्या (sic!) $\gamma$ तत्प्रवर्त्यन्तामपरिहीयमानमातोयविन्या (मान sic!) 13. $\gamma$ किल fehlt; $\beta$ भवतः fehlt, A भगवतः. 14. $\beta\gamma$ नुगतस्य; $\beta\gamma$ विहितकाम्यया B$\alpha$ हितकाम्यया T हितकाङ्क्षया; $\alpha\beta\gamma$T स्वयं प्रतिपन्न; $\alpha\beta\gamma$T दौत्यस्य. 15. BT नोर्देवस्य चक्र; beng. शिविरसंनिवेशं प्रति ($\beta$ वेश्म इति). 16. $\alpha\gamma$T ज्ञगदुत्पत्तिस्थिति, $\beta$ नु खलु-गवता fehlt, sodann स्वर्गस्थितिप्रलयप्रभवि, $\gamma$ निरोध fehlt, अय fehlt. 17. und 18. $\beta$ राजन्यकं $\gamma$ राजचक्रं $\alpha$ राजचक्रालंकरणपाणडुराजपुत्र; $\alpha\beta$T प्रशमन; $\beta$(?)T हेतुनानेन; $\beta$ स्वयमविग्रहकारिणा संधिकाङ्क्षिणा कंसा 19. ACP नेपथ्ये। तत्कि; Abeng.T. पारिपार्श्विक. 21. ABP प्रविश्य fehlt 22. T कतमं सम; B गीयतां तावत्। 23. B संप्रतिपन्नममुमेव (aus संप्रति संपन्नममुमेव, wie es scheint, corrigirt). Das Weitere siehe zu 5, 1.

5. 1. B सप्तच्छदकाशकुमुदधवलितदिङ्मण्डलविमलतलाशयं $\beta$ सप्तच्छदकाशकुसुमपुण्डरीककुमुदकोकनदधवलिताशेषदिङ्मण्डलं प्रसन्नभुवगगनतलाशयं स्वादुसलिलं शर $\gamma$ काशकुसुमकुमुदधवलिताशेषदिङ्मण्डलविमलसलिलाशयं $\alpha$ नक्षत्रग्रहक्रो, कुल fehlt, काशकुसुमकोकनदधवलिताशेषदिग्मण्डलं स्वादुसलिलाशयं, T wie A, aber पुण्डरीक statt कोकनद. 5. AP (B) प्रविश्य संभ्रान्त: पारिपार्श्वकः। 6. $\gamma$ ($\beta$) मारिष ननु प्रारब्धसमयवर्णनया हंसानहं धार्तराष्ट्रा इति व्यपदिशामि $\alpha$ प्रारब्धसमयवर्णनायां धार्तराष्ट्रा इति न धृतराष्ट्रसुतानस्किंतु हंसानहं व्यपदेशामि (sic). 7. beng.T तत्किं शान्तं पापं प्रतिहतममङ्गलम्। 8. B न खलु न ज्ञान $\beta$ भाव न खलु न ज्ञाने $\alpha\gamma$ न खलु ज्ञाने; beng अमङ्गलत्वाद्स्य; BCD वो fehlt; beng.T यत्सत्यं कम्पि. 10. $\alpha$ सूत्रधारः। पारिपार्श्विक तत्सर्वममङ्गलं प्रतिहतं दूतेन कंसारिणा। $\beta$ स्वयंप्रतिपन्नदौत्येन, so auch T. 12. $\beta$ वैरिदह 15. S सुस्था 16. AP हा; $\gamma$T आः पाप; B दुरात्मन् fehlt; B शैलूषाधम 18. BCS$\beta\gamma$T निचयेषु; $\gamma$ प्रकृत्य ($\beta$ ursprünglich?). 19. $\alpha\beta\gamma$S आकृष्य; $\alpha\beta\gamma$S केशान् 20. $\alpha\beta\gamma$S सुस्था (in $\beta$ in स्वस्था corrigirt); BT भवन्तु. Vers 8. fehlt an dieser Stelle in B und $\alpha$, statt dessen hat B: मयि जीवति कथं स्वस्था भवन्ति धार्तराष्ट्रा इति, $\alpha$: सुस्था भवन्ति मयि जीवति धार्तराष्ट्राः. 21. B$\beta$ fehlt, $\alpha$ सूत्रपारिपार्श्विकौ। नेपथ्याभिमुखमालोक्य। T सूत्र°। आकर्ण्य सभयं नेपथ्याभिमुखमवलोक्य च। 22. B$\beta$ fehlt. T आः कुत. 23. beng.T अये कथमयं वासु.

6. 1. कीनाश-भीषणा fehlt in der beng.Rec. und T, B भीषणा fehlt; T भ्रूकुटि. 2. beng.T भ्रुकुटिना दृष्टिपातेनापिब; beng. सर्वान्सहदे 3. beng. वर्तते। तद्दित आवामन्यत्र गच्छावः।

7. 2. T आः पाप दुरा; B$\alpha$ statt der scenischen Bemerkung: Vers 8. (s. zu 5, 20.). 4. $\alpha\gamma$T सहदेवः। सानुनयम्। आर्य; A nur Einmal मर्षय, B nur आर्य। 5. $\beta(\alpha\gamma)$T निर्वापावैरदहना इति पठित्वान्यथाभिनयति।, T daneben die Lesart: यथार्थमेव ज्ञतज्ञालंकृतवसुंधराः ज्ञतशरीराश्च सभृत्याः कुरवः स्वर्गस्था भवन्त्विति ब्रवीति। 7. $\gamma$ भीम°। सक्रोधोपहासम्। T भी°। सोपालम्भम्।; BT न खलु न खल्वमङ्गलानि चिन्तयितुमर्हन्ति; $\beta\gamma$ अनिष्टानि. 11. beng. चेन्न निषे. 12. $\beta\gamma$ भी°। सक्रोधम् T भी°। सरोषम्।; Bbeng.ST ज्ञत एव; TS एवाय प्रभति भिन्नो ऽहं. 14. BST हेतुर्न भवति $\alpha\beta\gamma$ हेतुर्भवति न. 16. S भीमो संधिं; B ज्ञटयथ AP यूयं च कुरुत.

Digitized by Google

8. 1. Beng. T सह°। सानुनयम्।; BT आर्य एव; BCDPT एवमतिसंभृतक्रोधेषु (CD कोपेषु), L एवमति (-संभ्रमक्रो° ?), $\alpha\beta$ एवमिति क्रुठेषु, $\gamma$ एवमिति कोपेषु. 2. BCPL सहासम् fehlt; beng. T मयि खिपते; ACP वत्स गुरुःखेद्. 8. beng. निवर्तस्व गुरुमनुवर्तस्व. 10 und 11. BCD fehlt, 11. L fehlt: एवं विज्ञापय. 12. CD$\beta$ लङ्घनार्हसि. 14. CD हेलोल्लासित. 16. $\gamma$T इति साटोपम्. 17. 18. $\beta$ शालकं प्रस्थितः।. 20. CD पि शस्त्रागारं, S प्यस्त्रागारं. 22. CD$\beta$ भी°। सवितर्कम्।. 22. 23. BCD$\beta$ विचिन्त्य, T +सहर्षम्; CD प्रधर्षितव्यैव मया; $\beta$T सप्रणाय सहदे; $\beta$T (CD) गृहीत्वा। वत्स आगम्यताम्। सहदेवः। यदार्यिप्रत्यार्यः। भीमसेनः। वत्स यदार्यः

9. 1. B$\alpha\gamma$ सख्यमिच्छन्न; B$\alpha\gamma$ पश्यतु। परिक्रामतः।, $\beta$T परिक्रम्य।; B (beng.) सहदेवः। इदं पाञ्चाल्याश्चतुःशालं प्रविशत्यार्यः।; T गृहप्रवेशं; beng. T भी°। सक्रोधं भूमावुपविशति।. 2. $\gamma$T अत्रोपविश्य मुहूर्तमार्यः, B अत्रोपविश्य प्रतिपालयत्वार्यः कृ. 5. BC beng. केन पणेन. 7. beng. कथं तस्य, AP हन्त statt अहह तस्य; C$\beta$ ईदृशमीदृश. 8. 9. BC beng. T न त्वया कथितं न च मया भीमेन श्रुतम्।. 9. AP setzt die scenische Bemerkung vor तद्वत्स lin. 8. 12. beng. समस्तस समस्तस भट्टिणि।; beng. T अज्जपाइस्सदि दे मणणुं णिच्चाणुबठकुलुवेलो कुमालो भीमसेणो ($\beta$ कुरुकुल). 13. $\gamma$T कर्णौ दत्त्वा नेपथ्या; CD मुहुरपनीत. 14. CD$\alpha\gamma$ पटलस्थगित $\beta$ आप्याकुलित T परलावृत; AP समीपमुत्सर्पति; beng. तत्कष्टात्कष्टतर. 15. beng. ST ज्योतिरार्ये कुद्धेऽ प (B क्रोधेध!). 18. CD चेटी।. 19. CD चेटी fehlt; T देवि fchlt, 19. 20. $\gamma$ ($\beta$) अज्जपाइस्सदीति पूर्वीक्तं पठति।; A कुरुवैरो B कुरुवैलो; BD कुमार. 21. BD beng. दूरे°। निःशस्त्र।; T हन्त्रे बुद्धिमदिए; $\beta$ भोदि अत्थि तेव एदं; B पडिउलो भवे, beng. T राजो पडिउलो पा भवे. 22 und 23. Statt dessen $\beta$ ($\alpha\gamma$, auch in C hinzucorrigirt) und T als andere Lesart „इत्येव दाक्षिणात्यपुस्तके पाठः" an das vorhergehende anschliessend: ता णाधं पेक्खुहं (T पेक्खिदुं) तुवरदि मे हिअअं ता आदेसेहि मे अज्जउत्तस्स (T णाधस्स) वासभवणं। चेटी। इं भट्टिणी आणाबेदित्ति (T एदु एदु भट्टिणी।) (इति) परिक्रामतः। चेटी। एदं वासभवणं एत्थ (T ता) पविसहि (T पविसदु) भट्टिणी।, hiezu noch T($\alpha\gamma$): दूपदी। हन्त्रे कधेहि णाधस्स मह आगमणं। चेटो। इं भट्टिणी आणाबेदि। इति परिक्रम्योपसृत्य च।. 23. T उभे प्रविशतः।.

10. 1. T उपसृत्य fehlt; B तेदु तेदु कुमार।. 3. beng. T चेटी। दूपदीमुपसृत्य। भट्टिणि पिअं दे णिवेदेमि; AP लक्खिअदि. 4. B मं मानइस्सदि (sic); $\gamma$T तेव ता एत्य उवविं. 5. $\beta$ एअन्ति उअ CD एक्कन्त उअ; B सुणामि beng. सुणाम्ह; $\alpha\gamma$Jag ववसिदं को अणणो मम परिभवेण ($\alpha$ परिहरेण) खिज्जदि।. 6. ABP सक्रोधम् fehlt. 7. B कीरवकुलं. 11. PT एदिसं. 11. 12. CD$\beta$ पुणो वि दाव भणा. 13. P अप्रपवन्नेव। मग्ना, T सहदेव पश्य. 13—16. $\gamma$ fehlt. 14. T संदेशोऽयमव्यु BC$\beta$ संदेशोऽयमार्येणाव्यु S संदेशो ममाव्यु; S statt इव एवार्येण. 19. A वाहुणावतम्, BE इन्दूप्रस्थं तिलप्रस्थं CD इन्दूप्रस्थं सतिलप्रस्थं (!) माकन्दं (D मांसादो!), $\alpha$ कुशास्थलं मृगप्रस्थं माकन्दं, $\beta$ वृकस्थलं कुशास्थलं माकन्दं, $\gamma$ कुशास्थलं मृगास्थलं माकन्दं, L कुशप्रस्थं वृकप्रस्थं ज्ञयन्तीं, Mah. Bhâr. (ed. Calc.) V, 935 कुशास्थलं वृकस्थलं माकन्दीं. 20. BECD$\alpha\beta$ प्रयच्छ चतु; BE कंचिदेकं च पञ्चमं, CD किंचिदेवात्र पञ्चकं,



Digitized by Google

$\alpha\beta\gamma$ wie B ($\beta$ किंचि°), L wie A (aber कंचि°), Mah. Bhâr. श्रवसानं भवेदत्र कंचिदेकं च पञ्चमं. 22. CD प्रतिनाम fehlt; B ग्राम fehlt. 23. beng. गृहदाहमायायूत; B सभाप्रवेशनाय; CD beng. मन्ये.

11. 1. E किं स्यात्. 2. BCD श्रार्य लोके तावत्स्वगो, B गोत्रावसाद्; $\alpha\beta\gamma$ (तावत् fehlt) T श्रार्य एवं कृते लोके तावत्स्व; E wie APL durch Correctur. E विष्कृतं भवति. 6. $\beta$ ($\gamma$) प्रसिठश्चायं लोके धृतराष्ट्रस्य कुलजयः। $\alpha$ प्रसिठश्च लोके। (!) T प्रसिठश्च लोके ऽ पि धार्त; beng. T nach जयः। सहदेवः। लज्जां नाटयति। भीमः।. 10. $\beta$T पाञ्चाली। त्वरते मे मनः संग्रामावतरणाय।. 12. beng. T (CD) श्रागतापि fehlt. BC beng. नोपलक्षिता. 13. T दृष्ट्वा। सादरम्।; beng. T समुठतामर्षे. 16. B परितापमात्मा Cβ परिभवामर्षमात्मा; $\alpha\gamma$T समर्थयस्व। द्रौपदी सखेदं निःश्वसिति। भीमः।. 18. CD किं नि. 20. CD चिरमग्रो; CD ($\beta$) प्रोषितेषु च।. 22. बुठिमदीए, beng. कधेहि दाव. 22. 23. Lenz liest $\beta$: श्रपणो मे परिभवो हृत्तादि ??, wahrscheinlicher wie $\alpha\gamma$ (A).

12. 1. beng. (mit Varianten) T चेटी। इं देवी श्रापाञ्चेदि। भीममुपसृत्य। श्रञ्जलिं बठ्ठा। कुमाल इदो बि; beng. T श्रहिश्चदरं. 4. CD$\beta\gamma$ (!) बक्कवेणीं. 6. T परिविदा $\beta$ श्रणुगदा $\gamma$ परिगदा. 7. T युज्यते यतो ऽ मि, BCD beng. fehlt die ganze Linie, sowie das folgende चेटी।; T गुरवः। ततस्ततः।; L युक्तमेतत् (das Weitere verdorben). 8. CD पिावन्नमा $\gamma$ पिाविन्नमा T विवुन्नमा. 9. beng. T भीमः। सक्रोधम्।; T हन्त स्थानं क्रोधस्य संप्रतं देव्याः। L हन्त स्थानं कोपस्य संप्रतं, CD = L (संप्रतं fehlt), B हन्त स्थाने कोपः $\alpha\gamma$($\beta$) हन्त स्थानं खेदस्य देव्याः।. 10. BC beng. सहीश्रपा; T इसि fehlt; L$\beta$ ईसि B ईस $\gamma$ इस. 11. $\beta$ भणिदा. 12. APLT दृष्टा उक्ता च. BCD beng. fehlt die Linie, sowie das folgende चेटी।. 13. CD beng. T श्रइ. CD beng. पञ्च — सुणीश्रदि fehlt. T ता कीस. 15. B (beng.) श्रुतं यच्छत्रुभार्यायाभिहितम्।. 16. beng. किमिहोच्यते fehlt; beng. S (BCD) उचितमेवैतत्तस्या यतो. 22. beng. एवं मए. $\beta$ ($\alpha\gamma$) परिकुविश्च भणिदं. B$\gamma$T श्रइ. 23. S केसहत्थेसु.

13. 2. $\beta$T ($\alpha\gamma$CD) प्रयच्छति। श्रधीरमासनादुत्तिष्ठन् (C सधी). beng. T श्रयि पाञ्चालतनये श्रलं विषादेन किं. 3. beng. बहुना। श्रचिरेणैव कालेन यत्करिष्ये तच्छ्रूयताम्। T श्रचि — लेन fehlt vor यत्, steht wie in der Dev. nach श्रूयताम्।. 6. $\alpha$ स्थानापवठ (verschrieben aus -विठ?) $\beta$ स्थानावरुठ (corr. in -वनठ) $\gamma$ स्थानापविठ. 8. ABPL तुयि CDT तुए $\beta$ तए; beng. T कुञ्चिदेणा. T श्रणुगेपणन्तु. 14. BCD beng. T स्तार्णावास्मः; CD beng. T श्रुत. B$\beta\alpha\gamma$ कुहरचलन्म. 16. B कुरुकुल beng. कुरुश्रात. 17. T रुसितसमो. T ताड्यते. 19. $\beta$ कञ्चुकी। ज्ञयति ज्ञयति कुमारः।.

14. 2. beng. भीमः। हन्त विघटितः संधिर्भग्नावूरू सुयोधनस्य। श्रथ संयम्यमानेन भगवता किनाश्चार्य दर्शितम्।. 4. CD$\beta\gamma$ स्मत्सेनाग्निविर. A श्रविलम्बितं $\alpha\gamma$ श्रविलम्बितं fehlt, B त्वरितं. 5. Statt भगवन्तं B (C$\gamma$): देवं वासुदेवं; $\alpha\beta$ भीमसेनः। bis lin. 6 च्छति fehlt. 6. B beng. श्राकाशे दत्तदृष्टिः। fehlt. $\gamma\beta$ श्राः fehlt. $\beta$ पांसुक $\alpha\gamma$T पांसल. C$\beta$ एवमुत्क्रान्त. 8. $\alpha\gamma$Jag

Digitized by Google

सुयोधनहतको. 10. β दुरात्मा सुयोधनहतकं. 11. beng. T विहितत्रयो. 12. beng. T ज्ञानोद्रेका. 13. BCDT कमपि. 14. P वेत्तु. 15. β आर्य त्रयंधर. CDγ (β) वक्ष्यति गुरुः, B schwankt. 18. द्रुपद — सहदेव in β unvollständig. 19. B चमूपतयश्च. 22. beng. T S नृपसुताकेश. 23. S कुरुबले.

15. 1. आकर्ण्य सहर्षामर्षम् fehlt in B. 2. beng. T पुनर्नेपथ्ये कलकलः। 3. beng. T द्रौपदी। सविस्मयम्। L कह दाणिं; B beng. T S किं दाणिं. T bringt als eine Lesart nach एसो: चपउद्घोसदाल्लणो. घणा fehlt in PS. B beng. T त्यणिाद्. S (p. 348) statt मंसलो मत्थरो. 4. P खणे खणे चपउद्घोसो u. s. f. 6. CD beng. fehlt. 10. CD क्रुशापनाद्: 11. P हतो दुन्दुभिः। 12. B अनुज्ञया β अनुज्ञात; αγ वयमिदानीं कुरुकुलनिधनाय। rel. fehlt. 14. BCDT भीमसेनः। वत्स। एते. 14. 15. αγ fehlt. 17. B(β) होदु। यत्र कुन्ती भणादि। CD तं च अम्बा देवी भणादि; αγ (T als Lesart) तं च अम्बाकुन्दी आसासदि तन्नुम्हाणं होदु। 18. 19. S णाध पुणो बि तए समासादइदव्वा। 20. BC beng. देवि मयालीका, T देवि किमलीका. T श्वासनेन. 21. S परिभवज्ञान्ति. S लज्जाबन्धुरिताननम्।.

16. 1. EP अणावेक्खिद; rel. अणापेक्खिद. 3. β भीमसेनः। देवि ममापि खलु भीमसेनस्याप्रमत्तसंचार्यापि रिपुबलानि। beng. T अयि सुक्षत्रिये. beng. शक्ता वयं. beng. T वयमस्मिन्नृपे परिक्रमितुम्। शृणु। B समर्था वयं संक्रमितुम् fehlt. A संक्रामितुम्.

17. 2. CD beng. आदिष्टोऽस्मि. CD beng. यथा विनयंधर. 3. AL (B) सत्वरम्, fehlt bei den übrigen. 3. 4. β वन्दनकरणान्. 4. β द्रोणाराधेय. 5. CDJag संभावयितव्या. 6. beng. अहो fehlt; nach प्रभविष्णुता lesen βγ मात्रं, C मात्रमिदम्, α चात्र. 7. CD beng. T अवरोधव्यापारः। β उपालभे. 7. 8. BC beng. अन्तःपुरचारिणाम्. 8. वैयवहारिको findet sich in keinem MS, schien sich aber aus der Vergleichung der vorhandenen Lesarten als das Ursprüngliche zu ergeben und bietet einen guten Sinn. ACPLβ वैहारिको αγJag व्यावहारिको T व्यवहारिको B वैवहारिको. Nach wiederholter Prüfung geben wir aber doch वैहारिको den Vorzug, da der Sinn passt und A mit β stimmt. (B scheint beiderlei Lesarten zu verrathen). 9. B ईक्षितमलं. α नाकर्णितुं. 10. CD शक्रेणापि समाश्रिताप्यधिकृता. CPT समालम्ब्यते A समालम्बते B beng. समालम्बिता. 12. C स्वीकृतविग्रहस्य. 14. BCD देवी भानुमती. Cβ भानुमती न वेति. 15. B (C) beng. विजयमङ्गलप्रांसिनी. 15. 16. CD beng. गृहोद्याने B गृहपार्श्वोद्याने. 15. beng. अत्रस्थां fehlt.

18. 1. beng. देवीं fehlt. 2. BCDT अपि fehlt. 2. 3. B beng. अबलवत्सु fehlt, CD बलवत्सु अथवा किं बलवत्सु, γ ändert bis zum Schluss des Satzes willkürlich ab. 3. β अरिषु fehlt. T अरिषु च अथापि. B पुरसुखम् β पुरविहारसुखम्. 4. BC beng. इदमपरमयथातथं. 5. β खपउ statt कुपठ. 6. β सूनुभिरसौ. 9. T दैवतं T यावदत्रस्थां. 11. β प्रवेशकः 14. 15. β धीरदा γ धीरदाए. 17. So A(B)P, fehlt sonst. 18. T सन्निधानन्तो; AP पा हु किं पि पा पलम्बदि β पा किं पेक्खदि T किं पि पा fehlt. 19. LP

Digitized by Google

एदं statt इदं मे ; $\gamma(\beta)$ किं णु तं मे सिक्खिणाअं अदिमेत्तं अकु° पडि°. 21. u. folg. S. beng. पडिट्ठाअअन्तीओ.

19. 1. T देवदाणं. beng. fehlt दुव्वादिपडिग्गहेणा, statt dessen liest $\beta$ असउणं ; B (und T als weitere Lesart) दुआदि (T दुज्जादि). beng. पडिहणिस्सामो [J येन मया प्रतिज्ञापयन्त्या — — परिहरिष्यते।]. 3. $\beta$ असउणादंसणा. 7—9. fehlt beng. J ; CD haben ein Mittelding (D: भानु° । जाणामि । अज्ज सिक्खिणारामं मए भवणे । इति विस्मृतिं नाटयति।). 10. हला bis ता fehlt beng. ; statt dessen मुहुत्तं चिट्ठ u. s. f. सव्वं, so CLP beng., dagegen A सहं, B (चिट्ठ दाव सुमरिअ) असेसं (कहइस्सं). 14. [J महान्स्वल्पो]. 15. CD beng. J अपकारिणाम् . 16. beng. अभिहतमभिमन्युम् . 18. $\alpha\beta$ प्रभावेण. 18. 19. Statt वा कात्र श्लाघा lesen B (C) beng. का नामात्र श्लाघना (C नामास्त्र). 20. AP (L?) भगवान् . 21. $\gamma$ सनः श्रान्तश्च हत इति का श्लाघा कुरुपुङ्गवानां तत्र कश्चिन्नोष। । मूढ पश्य।. 22. APL$\gamma$ ज्ञास्यसि $\alpha\beta$SJ ज्ञास्यति.

